॥ श्रीजिनाय नमः ॥

# ॥ श्रीउत्तमकुमारचरित्र. ॥

( श्लोकबद्ध )

छपावी प्रसिद्धकरनार

पंडित श्रावक हीरालाल हंसराज

( जामनगरवाळा )

संवत् १९६५ सने १९०८

किंमत रु. ०–१२–०

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

☞ जामनगर जैनभास्करोदय छापखानामां छाप्युं.

P. P. Ac. Gunratnasuri M.S.

Jin Gun Aaradhak Trust

उंचा जाडा अने सफाइदार कागलोपर शुद्ध पानाने आकारे छपेलां तैयार पुस्तको.

श्रीगौतमकुलकवृत्ति—व्याख्यानमां वांचवालायक रसीक अने मनोहर उगणोतेर कथाउ सहित किं. रु. १—१२—०

श्रीपालचरित्र—संस्कृत—( अठाइमां व्याख्यान वांचवामाटे ) किं. रु. १—१२—०

श्रीचातुर्मासिकव्याख्यान तथा होलिकाकथा—(कर्त्ता क्षमाकल्याणकजी) किं. रु. ०—८—०

श्रीउत्तमकुमारचरित्र—श्लोकबद्ध ... ... ... ... किं. रु. ०—१२—०

( दरेक पुस्तकनुं टपालखर्च जूदुं समजवुं. )

मलवानुं ठे.—श्रावक हीरालाल हंसराज—जामनगर. (काठीयावाड)

## जाहेरखबर.

नीचे लखेलां पुस्तको पानाने आकारे शुद्ध करीने सारा मोटा जैनी टाइपोमां छपाइ तैयार थयेलां छे. मगाववाथी वी. पी. थी मोकलवामां आवशे.

( थोमीज नकलो बाकी रहेली छे. )

श्रीकल्पसूत्रनी सुखबोधिकाटीका मूलसहित–( कर्त्ता विनयविजयजीउपाध्याय ) रु. ६–०–०
श्रीअट्ठाइव्याख्यान—( कर्त्ता श्रीक्षमाकल्याणकजी )... ... ... रु. ०–५–०
श्रीपाक्षिकसूत्रावचूरिः—( संस्कृत ) ... ... ... ... रु. ०–८–०
श्रीसाधुप्रतिक्रमणसूत्रावचूरिः ( संस्कृत ) ... ... ... ... रु. ०–४–०
श्रीयुक्तिप्रकाश सटीक–( कर्त्ता पद्मसागरगणी ) स्याद्वादकलिका–अष्टकानि च रु. ०–८–०
श्रीधम्मिलचरित्र श्लोकबद्ध—( कर्त्ता श्रीजयशेखरसूरिः ) ... ... रु. ३–०–०

पुस्तको मलवानुं ठेकाणुं—श्रावक हीरालाल वि. हंसराज.

( टपालखर्च जूदुं समजवुं ) जामनगर—( काठीयावाम )

# विज्ञापना.

आजकालमां आपणा प्राचीन आचार्यजीमहाराजोए उपकारबुद्धिथी अथाग श्रम लेइ प्राचीन समयमां रचेला ग्रंथो लखाववामां घणी मुश्केलीउ नडे छे, एक तो शुद्ध लखनारा लहीआउ घणाज थोडा मळे छे; अने जे मळे छे, तेमांना पण घणाखरा प्रमादी तथा गेरभरुसादार मळे छे, जेथी भंडारोमाटे तथा मुनिमहाराजोमाटे पुस्तको लखाववामां घणी अगवड आवी उभी छे. वळी केटलाक लहीयाउना हाथथी लखेलां पुस्तको तो अत्यंत अशुद्धताने लीधे निरोपयोगीजेवांज थइ पडे छे, अने तेथी तेमाटे करेलो द्रव्यनो व्यय पण नकामो जाय छे. माटे उपरलखेली अगवड दूर करवाने में मारी शक्तिमुजब बनते प्रयासे शुद्धकरी मुनिमहाराजोमाटे तथा भंडारोमाटे छापी प्रसिध करवानुं कार्य प्रारंभ्युंछे. आथी थोडा द्रव्यखरचथी तमाम मुनिमहाराजोने तथा मोटां शेहेरोमां ज्ञानभंडार करवाना अभिलावीउने शुद्ध छापेलां पुस्तकोनो लाभ मळीशकशे. हालमां तो ते दरेक ग्रंथोनी फ-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

क्त सो सो नकलोज छपवानी में शिरुआत करी छे, केमके अनुभवपरथी एम मने जणायुं छे के, हजु आजकालमां तेथी वधारे नकलोनी खपती थशे नही. सामान्यदृष्टिथी जोतां आजकाल बीजा छपाता सेंकडो गमे साधारण पुस्तकोनी अपेक्षाए मारा छपेला आ ग्रंथोनी जोके किमत वधारे लागशे, परंतु में फक्त एकसोज नकलो छापी छे, ए वातपर ज्यारे मनन थशे, अथवा कोइ छापखानावाळानी तेमाटे जो सलाह लेवामां आवशे, तो तुरत मालुम पडशे के में ते पुस्तकोना शुद्ध करी छपवाना थता खरचना प्रमाणमांज योग्य किमत राखी छे. केमके पुस्तकोनी जो हजारो नकलो छपवामां आवे तोज तेनी ओछी किमत राखवी पोसाय, परंतु आवा ग्रंथोनी कंइ हजारो नकलो खपे नही. हालमां में छपेलां चार पांच पुस्तकोमां पातळा कागळो वापरेला होवाथी केटलाक मुनिमहाराजो विगेरे तरफथी जाडा अने ऊंचा कागळो वापरवामाटे मने भलामण करवामां आवी छे; जे भलामण स्वीकारीने हवेथी आ श्रीउत्तमकुमारचरित्र, चातुर्मासिकव्याख्यान होलीकाकथा साथे, तथा गौतमकुलकवृत्ति, श्रीपालचरित्र, शत्रुंजयमाहात्म्य तथा पांडवचरित्र

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# विज्ञापना.

आजकालमां आपणा प्राचीन आचार्यजीमहाराजोए उपकारबुद्धिथी अथाग श्रम लेइ प्राचीन समयमां रचेला ग्रंथो लखाववामां घणी मुश्केलीउ नडे छे, एक तो शुद्ध लखनारा लहीआउ घणाज थोडा मळे छे; अने जे मळे छे, तेमांना पण घणाखरा प्रमादी तथा गेरभरुसादार मळे छे, जेथी भंडारोमाटे तथा मुनिमहाराजोमाटे पुस्तको लखाववामां घणी अगवड आवी उभी छे. वळी केटलाक लहीयाउना हाथथी लखेलां पुस्तको तो अत्यंत अशुद्धताने लीधे निरोपयोगीजेवांज थइ पडे छे, अने तेथी तेमाटे करेलो द्रव्यनो व्यय पण नकामो जाय छे. माटे उपरलखेली अगवड दूर करवाने में मारी शक्तिमुजब बनते प्रयासे शुद्धकरी मुनिमहाराजोमाटे तथा भंडारोमाटे छापी प्रसिध करवानुं कार्य प्रारंभ्युंछे. आथी थोडा द्रव्यखरचथी तमाम मुनिमहाराजोने तथा मोटां शेहेरोमां ज्ञानभंडार करवाना अभिलावीउने शुद्ध छापेलां पुस्तकोनो लाभ मळीशकशे. हालमां तो ते दरेक ग्रंथोनी फ-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विगेरे ग्रंथोमां ऊंचा; जाडा, लीसा अने सफाइदार कागळो वापर्या छे. माटे आ में प्रारंभेलां कार्यने दरेक मुनिमहाराजो तथा ज्ञानभंडार करवानी अभिलाषा धरावनार दरेक शेहेरना गृहस्थो मने योग्य मदद आपशे एवी आशा छे. आ पवित्र ग्रंथो छापवामां तेने लगती कोइ पण जातनी आशातना अमारा छापखानामां न थाय, तेमाटे पूरती काळजी राखवामां आवी छे, तेथी तेमाटे कोइये पण शंका करवाजेवुं नथी.

लीं. सर्वसंघनो दास.

शा. हीरालाल हंसराज—( जामनगरवाळा. )

चोपडीने आकारे तैयार जैनपुस्तको.

स्याद्वादमंजरी—( मूळ, टीका तथा गुजराती भाषांतरसहित ) किं. रु.—४—०—०
जैनधर्मनो प्राचीन इतिहास भाग पहेलो ... ... ... रु.—१—०—०
जैनधर्मनो प्राचीन इतिहास भाग बीजो ... ... ... रु.—१—०—०

मळवानुं छे. शा. हीरालाल हंसराज.—जामनगर. ( काठीयावाड )

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नीचेना पुस्तको जाडा अने सफाइदार कागलोपर पानाने आकारे शुद्ध
सारा अने मोटा जैनीटाइपोमां छपाय छे.

श्रीशत्रुंजयमाहात्म्य–श्लोकबद्ध—( कर्त्ता श्रीधनेश्वरसूरिः )
श्रीदशवैकालिक सटीक—( समयसुंदरजीकृत टीकासहित )
श्रीउत्तराध्ययनटीका—( कर्त्ता श्रीलक्ष्मीवल्लभसूरिः )
श्रीलोकप्रकाश–भाग बीजो—( क्षेत्रलोकप्रकाशः ) कर्त्ता श्रीविनयविजयजी उपाध्यायजी
” ” ” त्रीजो ( काळलोकप्रकाशः ) ” ” ” ”
” ” ” चोथो ( भावलोकप्रकाशः ) ” ” ” ”
श्रीपांडवचरित्र–श्लोकबद्ध—( कर्त्ता श्रीदेवप्रभसूरि मलधारी )
श्रीसंदेहविषौषधीनामकल्पसूत्रव्याख्या—( कर्त्ता श्रीजिनप्रभसूरिः )

उपर लख्याशिवाय बीजा पण पुस्तको छपाय छे, दरेक पुस्तकनुं पोस्टेज जूदुं समजवुं.

मलवानुं छे.–श्रावक हीरालाल हंसराज.–जामनगर. ( काठीयावाड )

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

॥ श्रीजिनाय नमः ॥

## ॥ अथ श्रीउत्तमकुमारचरित्रं प्रारभ्यते ॥

वंदित्वा स्वगुरून् भक्त्या । ध्यात्वा देवीं सरस्वतीं ॥ सुपात्रदानमाहात्म्यं । मंगलार्थं प्रतन्यते ॥ १ ॥ चतुःप्रकारधर्मेषु । दानमेवाधिकं मतं ॥ भुज्यते यन्मनोऽभीष्टं । सुखं दानप्रभावतः ॥ २ ॥ यतः—

अभयं सुपत्तदाणं । अणुकंपाउचियकित्तिदाणाइं ॥
दुन्निहिं मुक्को भणिओ । तिन्नि उ भोगाइयं दिंति ॥ ३ ॥

तथा—गिहमागयाणमुचियं । दाणं जइवि हु जिणेहिं न निसिद्धं ॥ तहवि हु सुपत्तदाणं । अणंतफलदायगं होइ ॥ ४ ॥ दानं कीर्त्तितरंगिणीकुलगिरिर्दानं निधिः श्रेयसां । दानं [1]संवदनं समस्तजगतां दानं निदानं श्रियां ॥ दानं दुर्जनमानमर्दनमहो दानं गुणोत्कर्षकृत् ।

[1] वशीकरणं.





P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

किं चान्यैर्भुवि दानमेव सकलस्वेष्टार्थसिद्धिक्रमं ॥ ५ ॥ अभिगम्योत्तमं दान-माहूतं चैव मध्यमं ॥ अधमं याचितं दानं । सेवादानं तु निष्फलं ॥ ६ ॥ आसंसाइविरहिअं । सद्धारोमं-चकंचुइज्जंतो ॥ कम्मक्खयहेउं चिय । दिज्जइ दाणं सुपत्तेसु ॥ ७ ॥ न्यायोपात्तं समुचितगुणं कल्पनीयं यतीनां । वस्त्रं पात्रं परममशनं भेषजं रोगहारि ॥ दत्तं भक्त्या विमलमनसा श्रावकेण प्रकामं । मुक्तिं दत्ते नरसुरसुखे का कथाऽयत्नलभ्ये ॥ ८ ॥ यद्वस्तु वस्त्रासनस्वाद्यखाद्यं । पात्रं तथा भेषजकंबलादि ॥ दोषैर्विमुक्तं यतये द्विचत्वा-रिंशन्मितैर्देयमिदं विशुद्धं ॥ ९ ॥ श्रीधन्यशालिभद्राद्या । दृष्टांताः संति भूरिशः ॥ सुपात्रदानसंबद्धाः । प्रसिद्धा जिनशासने ॥ १० ॥ श्रीउत्तमकुमारस्य । महदाश्चर्यकारकं ॥ साधुदानफलश्लाघ्यं । चरित्रं किंचिदुच्यते ॥ ११ ॥

इहैव भरतक्षेत्रे । देशे श्रीकाशिनामनि ॥ पुरी वाराणसी लक्ष्मी-व्याप्ता स्वर्गपुरीसमा ॥ १२ ॥ विपक्षद्विपशार्दूलः । स्वभुजाक्रांतभूतलः ॥ मकरध्वजभूपाल-स्तत्राभूद्भूरिविक्रमः ॥ १३ ॥ तस्य लक्ष्मीवती राज्ञी । रूपसौभाग्यशालिनी ॥ चतुःषष्टिकलादक्षा । जज्ञे

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

धर्मपरायणा ॥ १४ ॥ भुंजानयोस्तयोः प्रीत्या । सदा वैषयिकं सुखं ॥ सुस्वप्नसूचितः पुत्रो । जातः श्रीउत्तमाभिधः ॥ १५ ॥ पंचांबालाळ्यमानोऽसौ । संजातश्चाष्टवार्षिकः ॥ क्षिप्तो लेखकशालायां । पाठितुं सकलाः कलाः ॥ १६ ॥ दयालुः सत्यवादी स । परनारीसहोदरः ॥ तृणमात्रमपि प्रायः । परकीयं न वांछति ॥ १७ ॥ द्विसप्ततिकलापात्रं । विनयावर्जितप्रजः ॥ परकार्यरतो वीरः । कोटीरः सुधियां निधिः ॥ १८ ॥ दाता भोक्ता गुणग्राही । दीनदुःस्थितवत्सलः ॥ निश्चलः स्वप्रतिज्ञायां । लोकाचारविचारवित् ॥ १९ ॥ एकदावसरे रात्रौ । चिंतयामास मानसे ॥ परदेशे गमिष्यामि । परीक्षार्थं स्वकर्मणां ॥ २० ॥ चतुर्भिः कलापकं ॥ यतः—

दीसइ विविहच्चरियं । जाणिज्जइ सज्जणदुज्जणविसेसो ॥
अप्पाणं च कलिज्जइ । हिंडिज्जइ जेण पुहवीए ॥ २१ ॥

चचाल खड्गमादाय । चित्रकूटगिरिं गतः ॥ तत्रासीद्धरणीपालो । महसेनः पराक्रमी ॥ २२ ॥ मेदपाटादिदेशाना–मधीशः परमार्हतः ॥ गृहवासं मन्यमानो । मृगपाशमिवा-



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

खिलं ॥ २३ ॥ पुत्राभावात्परं राज्य—मसारं परिचिंतयन् ॥ मनोरथशतैरेव । पुत्ररत्नम-वांछत ॥ २४ ॥ तथाच—

अपुत्रस्य गृहं शून्यं । दिशः शून्या अबांधवाः ॥
मूर्खस्य हृदयं शून्यं । सर्वशून्या दरिद्रता ॥ २५ ॥
यत्र नास्ति गुणगौरवचिंता । यत्र न स्वजनसंगतिरुच्चैः ॥
यत्र नो लघुलघूनि [1]शिशूनि । हंत तान्यपि गृहाण्यगृहाणि ॥ २६ ॥

एकदा सोऽवनीपालो । बहुपुंभिर्विराजितः ॥ कृष्णवर्णं समारूढ—स्तुरंगं निर्ययौ बहिः ॥ २७ ॥ परमश्वो महाशूरो । गतिभंगं करोत्यलं ॥ राजा पप्रच्छ मंत्रीशान् । को रोगोऽश्वस्य वर्त्तते ॥ २८ ॥ न जानंति परं केचि—दायातस्तावदुत्तमः ॥ कुमारः प्रोचिवान् स्पष्टं । शिष्टकर्णामृतोपमं ॥ २९ ॥ महिष्या दुग्धपानेन । वातपूरोऽभवद्भृशं ॥ तेनाश्वस्य गतेर्भंगः । संजातो धरणीपते ॥ ३० ॥

१ 'शिशु' शब्दो नपुंसके न संभाव्यते.

॥ ४ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एवं निशम्य भूपालः । प्रोचे श्रीउत्तमंप्रति ॥ वत्स स्वज्ञमतेऽश्वस्य । कथं जानासि दूषणं ॥ ३१ ॥ सोऽप्यवोचन्महाराज । परीक्षाकुशलोऽस्म्यहं ॥ वाजिनो दूषणं तेन । ज्ञातं मत्यनुसारतः ॥ ३२ ॥ भूपालोऽप्यूचिवान् सत्यं । विपन्ना वडवा ततः ॥ अश्वस्य पायितं दुग्धं । महिष्याः पुष्टिहेतवे ॥ ३३ ॥ वत्स त्वं राजपुत्रोऽसि । निर्णीतस्तव बुद्धिभिः ॥ ततो गृहाण मे राज्यं । सप्राज्यं कुरु सांप्रतं ॥ ३४ ॥ निर्गत्य संसारसमुद्रमध्या—दीक्षां गृहिष्यामि जिनेश्वरस्य ॥ जगाद तावत् स तु तत्प्रमाणं । तथापि वार्त्तां श्रुणु मामकीनां ॥ ३५ ॥ स्वामिन् स्वसद्मतः शीघ्रं । कौतुकार्थं विनिर्गतः ॥ ततोग्रेऽहं गमिष्यामि । दर्शनार्थं धरातले ॥ ३६ ॥ वलमानस्तवादेशं । करिष्यामि न संशयः ॥ इत्युक्त्वा कुमारो रात्रा—वग्रतश्चलितस्ततः ॥ ३७ ॥ पुरग्राममहारामा—नुल्लंघयति स त्वरं ॥ कियद्भिर्दिवसैः प्राप्तो । भृगुकच्छाभिधं पुरं ॥ ३८ ॥ तस्मिन्नवसरे तत्र । लोकानां मुखतः श्रुतं ॥ नानावस्तुभृतैः प्रौढ—पोतपंचशतैः सह ॥ ३९ ॥ अन्यैरपि घनैर्लोकै—र्द्रव्योपार्जनहेतवे ॥ श्रेष्ठी कुबेरदत्ताख्यः । परद्वीपे गमिष्यति ॥ ४० ॥ युग्मं ॥ अष्टादश योजनशत—मानो मुग्धाभिधो महा-



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

द्वीपः ॥ लवणोदधेर्मध्यगतो । लंका यत्रास्ति सारपुरी ॥ ४१ ॥ एवं श्रुत्वा लोकवार्ता–मुत्त-
मोऽपि कुमारराट् ॥ मनसि चिंतयामास । समयोऽयं मुदे मम ॥ ४२ ॥ कुवेरदत्तमापृछ्य
। कुमारोऽपि कुतूहली ॥ समारूढः प्रवहणं । सांयात्रिकजनैः सह ॥ ४३ ॥ इतः कियन्निर्दि-
वसैः । सर्वप्रवहणान्यपि ॥ अर्द्धमार्गे गतान्यब्धौ । तावत्संत्रुटितं जलं ॥ ४४ ॥ लोकाः शो-
कातुरा जाता । जीवने त्रुटिते सति ॥ तावदग्रे समायातः । शून्यद्वीपो महोदधौ ॥ ४५ ॥
उत्तीर्य सकला लोका । अकार्षुर्जलसंग्रहं ॥ इतश्च राक्षसः कोऽपि । दृष्टः सांयात्रिकैर्जनैः ॥
॥ ४६ ॥ स्पष्टं षष्टिसहस्राणां । राक्षसानामधीश्वरः ॥ सप्ततालसमानांगः । क्षामकुक्षिर्बुभु-
क्षया ॥ ४७ ॥ नाम्ना भ्रमरकेतुः स । मांसाशी क्रूरदर्शनः ॥ आगछन् यमजिह्वाभं । मह-
त्खड्गं करेऽधरत् ॥ ४८ ॥ त्रिभिर्विशेषकं ॥ तेनागत्य धृताः केचि–ल्लोकाः कोलाहलाकुलाः॥
केचिन्नष्टाः समारोहन् । पोतमध्ये भयातुराः ॥ ४९ ॥ किं जातं कः समायातः । कोऽयं
कोलाहलोऽभवत् ॥ उत्पातः कः समुत्पन्नः । क्षुभितः किं पयोदधिः ॥ ५० ॥ एवं सत्वा-
धिकः प्राह । कुमारः करुणानिधिः ॥ परोपकारकरणे । प्रवणः क्षत्रियाग्रणीः ॥ ५१ ॥ यु-



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ग्मं ॥ वीराधिवीरः सर्वेषां । सुभटानां शिरोमणिः ॥ सोऽगदन्निर्भया: सर्वे । स्वस्थास्तिष्ठं-तु भो जनाः ॥५२॥ तावता तैर्जनैःप्रोक्तं । राक्षसोऽयं समागतः॥ भापयन् सर्वलोकानां। कालरात्रिरिवापरः ॥ ५३ ॥ अस्माकं शरणेतानां । रक्ष रक्ष महाबल ॥ यतो हि भयभीतानां । रक्षणे महतां बलं ॥ ५४ ॥ यतः—

तावद्गर्जंति मातंगा । वने मदभरालसाः ॥
शिरोऽवलग्नलांगूलो । यावन्नायाति केसरी ॥ ५५ ॥

एवं लोकैः स विज्ञप्तः । खड्गमादाय सत्वरं ॥ कुमारः कथयामास । राक्षसंप्रति सा-म्यतः ॥ ५६ ॥ वैरं नास्ति त्वया सार्द्धं । स्वस्थानं गच्छ सत्वरं ॥ न यास्यसि तदा नूनं । त्वत्पापं तव मस्तके ॥ ५६ ॥ स्फुरदोष्टपुटः कोपा—रुणाक्षो राक्षसो जगौ ॥ त्वं सं-ग्रामं मया सार्द्धं । कुरु यद्यस्ति पौरुषं ॥ ५७ ॥ इत्युक्तोऽथ चकारासो । समरं भ्रमरप्रदं ॥ कृपाणकुंतकोदंडै—र्मुष्टामुष्टि शराशरि ॥ ५८ ॥ विजित्य तं जनान् सर्वान् । मोचयामास सत्वरं ॥ कुर्वाणो युद्धमेकाकी । कुमारः सुभटाग्रणीः ॥ ५९ ॥ दूरं भूमिमतिक्रम्य । जि-



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तस्तेन स राक्षसः ॥ नंष्ट्वा पलायितो दूरं । जीवितव्यस्य हेतवे ॥ ६० ॥ उदधेस्तटमायाति । ततो यावत्कुमारराट् ॥ सर्वेऽपि चलितास्तावत् । कृतघ्ना यानसंयुताः ॥ ६१ ॥ कुमारश्चिंतयत्येव–मशुभं किं कृतं मया ॥ यन्मां मुक्त्वा गताः सर्वे । लोका धर्मविवर्जिताः ॥ ६२ ॥ [1]पलादतो मया सर्वे । रक्षिताः स्वबलेन ते ॥ तथाप्येते कृतघ्नास्तु । लोकाचारविवर्जिताः ॥ ॥ ६३ ॥ अद्यावधि कृतघ्नास्तु । श्रुता दृष्टाश्च सांप्रतं ॥ चिंतयन्निति चित्तेऽसौ क्षणं तत्रैव तस्थिवान् ॥ ६४ ॥ ततश्च सत्वरं सोऽथ। जलधेस्तटमाययौ ॥ भग्नपोतवणिक्चिन्हं । ध्वजं कृत्वा स्थितः सुधीः ॥ ६५ ॥ पत्रपुष्पफलव्रातैः । प्राणाधारं करोत्यलं ॥ पुरार्जितस्य पापस्य । दूषणं हृदि चिंतयन् ॥ ६६ ॥ द्वीपाधिष्टायिनीदेवी । दृष्ट्वा तद्रूपमद्भुतं ॥ कामरागातुरा जाता । दुरंता विषया यतः ॥ ६७ ॥ यतः–

सव्वगहाणं पभवो । महागहो सव्वदोसपाइड्ढी ॥
कामग्गहो दुरप्पा । जेणाभिभूयं जगं सव्वं ॥ ६८ ॥

---

१ राक्षसात्.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दर्शयामास सा रूपं । प्रत्यक्षीभूय सुंदरं ॥ शरानिव महातीक्ष्णान् । कटाक्षान् मुमुचे तथा ॥ ६ए ॥ उत्तुंगस्तननाभिभ्रू–विभ्रमानतिदुःसहान् ॥ सादर्शयन्मुहुः किंतु । न क्षुब्धः शीलवानसौ ॥ ७० ॥ हावभावा मनोभावा । द्वीपदेवीकृता अपि ॥ तस्मिन्न प्रभवंतिस्म । वज्रे लोहघना इव ॥ ७१ ॥ स्वांगसंगे सुधाकुंभे । सुभग क्रीमयाशु मां ॥ इति तस्या वचः श्रुत्वा–ऽकथयत्सोऽथ शीलवान् ॥ ७२ ॥ वाच्यं नातः परं मात–रेवं धर्मविरोधकृत् ॥ नैते ते मन्मथोत्तापा । मन्मनोवृत्तिभेदिनः ॥ ७३ ॥ संतुष्टा शीलमाहात्म्या–द्देवी द्वीपनिवासिनी ॥ साथ तस्य प्रशंसां च । चकार शुभभावतः ॥ ७४ ॥ चिरं जीव चिरं नंद । त्वं दुःसहव्रतधारक ॥ सदाचारिशिरोरत्न । रत्नगर्भा त्वया मही ॥ ७५ ॥ प्रत्येकं स्वर्णरत्नानां । कोटीर्द्वादश संख्यकाः ॥ ववर्ष सा कुमाराग्रे । गता च स्वाश्रयं सुरी ॥ ७६ ॥ यतः—

धम्मो मंगलमुक्किठ्ठं । अहिंसा संजमो तवो ॥
देवावि तं नमंसंति । जस्स धम्मे सया मणो ॥ ७७ ॥

इतः कियद्भिर्दिवसैः समुद्र–दत्ताभिधः कोऽपि समुद्रमार्गे ॥ समाययौ पंचशतप्रमाणैः ।





P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पोतैः समेतोऽत्र कृतप्रयाणः ॥ ७८ ॥ दीर्घपादपशाखायां । दृष्ट्वा वेल्लत्पताकिकां ॥ सोऽ-
चिंतयध्ध्रुवं कश्चि-त्पुरुषो वर्त्ततेऽत्र वै ॥ ७९ ॥ यावदग्रे समायातो । दृष्टो द्वादशकोटिभिः
॥ संयुक्तः पुरुषस्तेन । प्रहृष्टो हृदयेऽधिकं ॥ ८० ॥ पृष्टस्त्वं कस्य देशस्य । कथं तिष्टसि का-
नने ॥ कुमारोऽप्यवदत्तं च । भग्नपोतोऽस्म्यहं विभो ॥ ८१ ॥ श्रेष्टयपि स्वर्णरत्नादि-संयुतं
चोत्तमं वरं ॥ आरोहयत्प्रवहणे । परोपकृतिहेतवे ॥ ८२ ॥ इतः कियद्भिर्दिवसै-रर्द्धमार्गे ग-
तेंबुधौ ॥ पानीयं त्रुटितं सर्वे । जाताश्चिंतातुरा जनाः ॥ ८३ ॥ तृषाग्निना दह्यमाना । हा-
हारूपं रवं नराः ॥ प्रकुर्वंति यतः सत्यं । सर्वेषां मरणाद्भयं ॥ ८४ ॥

अथ निर्यामकः प्राह । भोभोः सांयात्रिका जनाः ॥ सिंचयन् सर्वसत्वानां । मेघव-
द्वचनामृतैः ॥ ८५ ॥ स्वस्था भवंतु यूयं च । सर्वं भव्यं भविष्यति ॥ जलकांतमयः स्पष्ट-
नीरः स्फटिकपर्वतः ॥ ८६ ॥ प्रकटीभवितात्रैवा-गाधः कूपोऽत्र वर्त्तते ॥ तस्मिन् कूपे सु-
धास्वादु । सुंदरं वर्त्तते जलं ॥ ८७ ॥ त्रिभिर्विशेषकं ॥ इति श्रुतं मया पूर्वं । निर्यामकमु-
खाद्वचः ॥ यतः परंपरायातं । वचनं न मृषा भवेत् ॥ ८८ ॥ संस्थाप्य सर्वपोतानि । शीघ्रं



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

संगृह्यतां जलं ॥ यतो भ्रमरकेत्वाख्यो । राक्षसोऽस्त्यत्र भीप्रदः ॥ ८९ ॥ मांसाशी मद्यमः क्रूरः । परदाररतस्तथा ॥ स च षष्टिसहस्राणां । राक्षसानामधीश्वरः ॥ ९० ॥ सोऽत्रैव वसते नित्यं । तटोत्तीर्णा जनास्त्वया ॥ भक्षणीया न पोतस्था । इति देवैर्निवारितः ॥९१॥ अथासौ राक्षसो नित्यं । वार्द्धौ भ्रमति सर्वतः ॥ पोतोत्तीर्णान् जनान् सर्वान् । भक्षति प्राणघातकः ॥ ९२ ॥ इति निर्यामिकेनोक्ते । लोकाः पश्यंति यावता ॥ गते वेलाजले तावत् । प्रकटोऽभूत्स पर्वतः ॥९४॥ तत्र तैर्ददृशे कूपः । सुस्वादुजलपूरितः ॥ अहो निर्यामिकप्रोक्तं । सत्यमेवेति तेऽलपन् ॥ ९५ ॥ नोत्तरंति परं ते च । राक्षसस्य भयाज्जनाः ॥ चिंतयंतो वरं मृत्युः । पिपासातो न राक्षसात् ॥ ९६ ॥

इतो वीराधिवीरोऽसौ । रणे धीरो विदांवरः ॥ अवोचदुत्तमस्ताव—दानेयं नो भयं मनाक् ॥ ९७ ॥ रक्षके वीरकोटीरे । मयि च भवति प्रभो ॥ शक्रादपि भयं कैश्चि—न्नानेयमिति निश्चयः ॥ ९८ ॥ पोतादुत्तीर्य निर्भीकः । कूपपार्श्वे जगाम सः ॥ दृष्ट्वा तच्छूरतां लोका । जाता आतंकवर्जिताः ॥ ९९ ॥ गृहीत्वा जलपात्राणि । रज्जूनां च शतानि च ॥ अ-



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

 


हंपूर्विकया लोका–स्तत्रायातास्तृषातुराः ॥ १०० ॥ रज्ज्वग्रे जलपात्राणि । बध्ध्वा कूपे ज-
लाशया ॥ क्षिप्तानि तावता तत्र । भग्नानि सकलान्यपि ॥ १ ॥ गत्वार्द्धमार्गे सर्वाणि ।
स्खलितानि तदा जनाः ॥ बभूवुः शोकसंपन्ना–श्चिंतयंति च चेतसि ॥ २ ॥ अस्मदीयं गृहं
कुत्र । नगरं कुत्र वर्त्तते ॥ अस्माकं स्वजनाः कुत्र । वर्त्तते ही सुखावहाः ॥ ३ ॥ प्रियाः प्रा-
णप्रियाः कुत्र । सुपुत्रा बांधवास्तथा ॥ एकाकिनो वयं वार्द्धौ । मरिष्यामो महार्त्तितः ॥४॥
अस्मिन् जलभृते कूपे । जले संत्रुटिते सति ॥ अस्माकं दैवयोगेन । तृड्निर्वृत्तिर्न जायते
॥ ५ ॥ एवमाहृद्दोहट्टं । कुर्वाणाः सकला जनाः ॥ गतप्राणा इवाभूवन् । मिलित्वा चिंत-
यंति च ॥ ६ ॥ बहुद्रव्यप्रदानेन । कोऽपि प्रक्षिप्यते नरः ॥ कूपमध्यादधश्च सर्वं । कर्दमं स
व्यपोहति ॥ ७ ॥ एवं विमृश्य सकलै–र्जनैर्नरः कोऽप्यवीवदच्चोच्चैः ॥ दास्यामो द्रविणम-
हो । अभीप्सितं ते न संदेहः ॥ ८ ॥ गत्वागाधे महाकूपे । कर्दमं त्वं पराकुरु ॥ यथा सां-
यात्रिकाः सर्वे । लोकाः स्युः सुखिनः क्षणात् ॥ ९ ॥ राक्षसभयतः कोऽपि । नरः प्रवेशं
करोति नो कूपे ॥ सकलजनानामिष्टं । यतो भवेज्जीवितं सुदृढं ॥ १० ॥ इति चिंतातुरान्



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

लोकान् । दृष्ट्वा श्रीउत्तमाभिधः ॥ सात्विकः प्राविशत्कूपे । नृपपुत्रो भटाग्रणीः ॥ ११ ॥
अर्द्धकूपे समायातो । दृष्ट्वासौ वरजालिकां ॥ स्वचित्ते चिंतयामास । नव्यहेमविनिर्मितां ॥
॥ १३ ॥ ॥ १२ ॥ कूपेऽत्र प्रचुरं वारि । जालिकांतर्गतं खलु ॥ गृहीतुं शक्यते नैव । तद्दूरीकरणं वि-
ना ॥ १३ ॥ एवं स हृदये ध्यात्वा । स्वर्णकंबा इतस्ततः ॥ विनमय्य विशालं तु । द्वारं च-
क्रे कुमारकः ॥ १४ ॥ ततः सांयात्रिकैर्लोकै-स्तद्गुणोज्ञानतत्परैः ॥ गृहीतं प्रचुरं वारि । पी-
तं च तृप्तिहेतवे ॥ १५ ॥ जलयोग्यानि सर्वाणि । भाजनानि भृतानि च ॥ परोपकारनि-
ष्ठानां । किमसाध्यं महात्मनां ॥ १६ ॥ कुमारश्च ततः कूप-भित्तौ द्वारं मनोरमं ॥ प्रायो
वक्रीकृतं तत्र । मानवानामगोचरं ॥ १७ ॥ तदग्रे स्वर्णसोपान-श्रेणिं निःश्रेणिकामिव ॥ दृ-
ष्ट्वा व्यचिंतयच्चित्ते । किमप्येतत्कुतूहलं ॥ १८ ॥ युग्मं ॥ पूर्वं तु पैतृकं राज्यं । त्यक्तं तृणमि-
वाखिलं ॥ दीयमानं महासेन-राज्यं न जगृहे मया ॥ १९ ॥ ततो मुग्धाभिधे द्वीपे । कौ- ॥ १३ ॥
तुकार्थं समागतः ॥ जीविताशां परित्यज्य । राक्षसो निर्जितः क्षणात् ॥ २० ॥ सांयात्रि-
का जनाः सर्वे । राक्षसादाशु मोचिताः ॥ सांप्रतं च तृषाक्रांताः । प्राणप्रांते समागताः ॥२१॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कूपमध्ये दयापूर–पूरितेन मयाधुना ॥ प्रविश्य प्रचुरं वारि । चक्रे लोकहितेच्छया ॥ २२ ॥
कूपमध्ये प्रविश्याथो–पकारः क्रियते पुनः ॥ परोपकारकरणं । महतां प्रकृतिर्यतः ॥ २३ ॥
सोपानैर्लंघयित्वाथ । श्रीउत्तमकुमारराट् ॥ प्रासादं मणिरत्नादि–निर्मितं दृष्टवान् पुनः
॥ २४ ॥ प्रथमायां गतो याव–द्भूमौ तावद्ददर्श सः॥ वलीमिलितसर्वांगां । निर्दंतां पतितस्त-
नीं ॥ २५ ॥ पिंजरीभूतशीर्षस्थ–केशपिंगललोचनां ॥ वृद्धामेकां जराजीर्णां । सा तं प्राह
वचस्ततः ॥ २६ ॥ रे पुण्यहीन निर्भाग्य । किमर्थं त्वमिहागतः ॥ न जानासि वराक त्वं ।
राक्षसस्य गृहं ह्यदः ॥ २७ ॥ कुमारः प्राह हे वृद्धे । जानामि स्वामिनस्तव ॥ माहात्म्यं
भ्रमरकेतो । राक्षसस्य बलीयसः ॥ २८ ॥ परं गरुडकेतोर्य–ज्ञाताहं का कथास्य तु ॥ तेन
बाहुबलेनैव । सात्विकोऽहं समागतः ॥ २९ ॥ अंब तेन भयं नास्ति । मम कस्यापि नि-
श्चितं ॥ भ्रमंति मादृशा येन । पश्यंतः कौतुकं भुवि ॥ ३० ॥ कस्येदं वर्त्तते स्थानं । कूपो-
ऽयं केन कारितः ॥ प्रासादोऽयं महान् कस्य । का च त्वं रक्षपालिका ॥ ३१ ॥ सान्निमानं
वचस्तस्य । श्रुत्वा वृद्धा जगाद सा ॥ सर्वसात्विककोटीर । वृत्तांतं शृणु मूलतः ॥ ३२ ॥

॥ १४ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अस्त्यासन्ने राक्षसानां । द्वीपे लंकाभिधा पुरी ॥ नाम्ना भ्रमरकेतुस्तु । तत्स्वामी राक्षसेश्वरः ॥ ३३ ॥ मदालसाभिधा तस्य । कन्या धन्या गुणैर्निजैः ॥ रूपसौभाग्यसंपूर्णा । तत्समा नो जगत्यपि ॥ ३४ ॥ चतुःषष्टिकलादक्षा । साक्षाद्देवी सरस्वती ॥ पूर्णेंदुवदना त्रस्त-हरिणीसमलोचना ॥ ३५ ॥ स्वसमानवयोभिः सा । सखीभिः सह लीलया ॥ क्रीमां प्रकुर्वती प्राप । यौवनं युवजीवनं ॥ ३६ ॥ पित्रान्यदा सभाप्राप्तो । नैमित्तिकशिरोमणिः ॥ संतोष्य बहुदानेन । पृष्टो विनयपूर्वकं ॥ ३७ ॥ प्राणेभ्योऽप्यधिका या मे । कन्या तस्या वरो वरः ॥ को भावीति वद प्राज्ञ । ज्ञानिनां विदितं न किं ॥ ३८ ॥ तेनोक्तं श्रूयतां नाथ । भूचरः सुभटाग्रणीः ॥ क्षत्रियाणां कुले जातो । विख्यातो जगतीतले ॥ ३९ ॥ दीनादीनां दानदाता । हंता कुपथचारिणां ॥ त्रिखंभभोक्ता जामाता । भविता ते न संशयः ॥ ४० ॥ तत् श्रुत्वा हृदयेऽत्यंतं । विषण्णो राक्षसाधमः ॥ मनसा चिंतयत्येवं । करिष्ये तद्वचोऽफलं ॥ ४१ ॥ सुप्रयुक्ता यतो बुद्धि-र्भवेत्स्वाभीष्टसिद्धये ॥ निश्चित्यैवं पलादोऽपि । दुष्टात्मा चिंतयत्यथ ॥ ४२ ॥ वार्द्धौ वेलागते नीरे । जलस्फटिकपर्वते ॥ तत्रागाधे महाकूपे । रक्ष-



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यामि स्वकन्यकां ॥ ४३ ॥ इति ध्यात्वा वक्रद्वार—प्रासादस्तेन कारितः ॥ तत्र कन्यां मुमोचासौ । तद्रक्षार्थमहं स्थिता ॥ ४४ ॥ भिन्नभिन्नप्रभावाणि । पंचरत्नानि दत्तवान् ॥ विषमायां दशायां स । सर्वकार्यकराणि वै ॥ ४५ ॥ वृद्धाहं भोजनाद्यर्थं । दासित्वेनास्मि रक्षिता ॥ सर्वं पूरयते प्रीत्या । पिता तस्या विमोहतः ॥ ४६ ॥ धनधान्यादिभक्ष्याणि । सुस्वादूनि फलानि च ॥ कूपांतः पतितानि स्यु—र्विरसानीतिकारणात् ॥ ४७ ॥ स्वर्णस्य जालिकास्तेन । कृता एताः समंततः ॥ एवं सुरक्षिता कन्या । कालं गमयते सुखं ॥ ४८ ॥

पुनर्मासे गते कश्चि—दन्यो नैमित्तिकोत्तमः ॥ समागतः सभामध्ये । पृष्टो भ्रमरकेतुना ॥ ४९ ॥ को वरो मम कन्याया । भावी सोऽप्यवदत्पुनः ॥ पूर्वनैमित्तिकप्रोक्तं । सत्यमेव भविष्यति ॥ ५० ॥ राक्षसः प्राह भो विद्व—न्नभिज्ञानं कथं मया ॥ ज्ञास्यते मम कन्यायाः । पत्युस्तत्प्रकटं वद ॥ ५१ ॥ स जगौ राक्षसाधीश । सावधानतया शृणु ॥ सांयात्रिकाणां सर्वेषां । नराणां भक्षणोद्यतं ॥ ५२ ॥ अस्मिन् द्वीपे समुद्रांत—र्यस्त्वां जेता नरोत्तमः । स एव तव कन्यायाः । पतिर्नूनं भविष्यति ॥ ५३ ॥ इति ज्योतिर्विदा प्रोक्तं ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मासादूर्ध्वं त्वया स्वयं ॥ साक्षादेवानुभूतं त–द्यत्कर्त्ता सोऽत्र तत् श्रुणु ॥ ५४ ॥ सांप्रतं मेलयन्नस्ति । सर्वराक्षसमंडलं ॥ तस्य पुंसो विनाशाय । न जाने किं भविष्यति ॥ ५५ ॥ एवं वृद्धावचः श्रुत्वा । कुमारो ध्यातवान् हृदि ॥ यो मया निर्जितः पूर्वं । स एव किल राक्षसः ॥ ५६ ॥ मायाविनी पलादानां । जातिः पापपरायणा ॥ शत्रुस्थानमिदं घोरं । सावधानो भवामि तत् ॥ ५७ ॥ इतस्तत्र समायाता । कुमारी सा मदालसा ॥ रूपं दृष्ट्वा कुमारस्य । संजाता रागविह्वला ॥ ५८ ॥ कृतस्तत्रैव गांधर्व–विवाहो विधिना तया ॥ साक्षिकं वृद्धराक्षस्याः । कुमारेण समं ततः ॥ ५९ ॥ पित्रा दत्तानि रत्नानि । देवताधिष्ठितानि च ॥ तया दत्तानि पंचापि । पत्युर्देयं न किं स्त्रिया ॥ ६० ॥ पृथ्वी जलं तथा तेजो । वायुराकाशमित्यहो ॥ एतेषां कार्यवेलायां । तत्प्रभावोऽधिकोऽधिकः ॥ ६१ ॥ मदालसां तथा दासीं । रत्नपंचकरंडकं ॥ लात्वा रज्जुप्रयोगेण । सर्वथा भयवर्जितः ॥ ६२ ॥ कूप मध्यं समागत्य । दृष्ट्वा कौतुकमद्भुतं ॥ निर्गतः सपरिवारो । वैरिस्थानं विमुच्य सः ॥ ६३ ॥ सांयात्रिका वदंत्येवं । कोऽपि देवोऽत्र मानवः ॥ आगतोऽद्भुतवेषेण । सर्वभूषणभूषितः ॥ ६४ ॥



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सर्वांगसुभगा केयं। देवी वा मानवी किमु ॥ अहो किमेतदाश्चर्यं । संजातमिति कथ्यतां ।६५।
वृत्तांतः कथितस्तेन । तुष्टाः सांयात्रिका जनाः ॥ कुमारश्चारूढः पोतं । परिणीतस्त्रिया सह ॥ ६६ ॥ समुद्रं लंघयत्येवं । सर्वे प्रीतिपरायणाः ॥ पुनः कियद्भिर्दिवसैः । प्रक्षीणं सकलं जलं ॥ ६७ ॥ लोकानां जीवितं येन । न भवेज्जीवनं विना ॥ अतीवव्याकुलीभूतान् । दृष्ट्वा लोकान् मदालसा ॥ ६८ ॥ प्राणप्रियं प्रियालापै-रवादीत्समयोचितं ॥ मञ्जूषणाकरंडस्थ-रत्नमाहात्म्यमीक्ष्यते ॥ ६९ ॥ युग्मं ॥ प्रथमं पृथिवीदेव्या-धिष्ठितं रत्नमस्ति यत् ॥ तभक्त्या पूजितं दत्ते । यत्सर्वं श्रूयतां विभो ॥ ७० ॥ सुवर्णरूप्यस्थालानि । रत्नकच्चोलकान्यपि ॥ स्थालीघटीघटादीनि । दत्ते मृद्भाजनान्यपि ॥ ७१ ॥ शयनासनवस्त्राणि । तथा धान्यान्यनेकशः ॥ सुगंधशालिगोधूम-मुद्गमाषादिकानि च ॥ ७२ ॥ हारार्द्धहारकेयूर-कर्णकुंडलमंडनं ॥ सुवर्णरत्नजटितं । रणन्नूपुरभासुरं ॥ ७३ ॥ नारीणां च नराणां च । योग्यमाभरणोच्चयं ॥ पूजितं प्रत्यहं दत्ते । प्रथमं रत्नमीदृशं ॥ ७४ ॥ चतुर्भिःकलापकं ॥ द्वितीयं जलरत्नं तु । गगने ध्रियते यदा ॥ अकालेऽपि तदा मेघ-वृष्टिर्भवति वांछिता ॥ ७५ ॥ तृती-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यं वह्निरत्नं तु । गगने ध्रियते यदा ॥ सूर्यपाकां रसवतीं । विनैधांसि विनानलं ॥ ७६ ॥
अनेकव्यंजनं क्षीरं । शालिदालिघृतप्लुताः॥ नानामोदकपक्वान्ना । जायंते च ततः क्षणात्
॥ ७७ ॥ युग्मं ॥ चतुर्थं वातरत्नं तु । धृतमाकाशमंडले ॥ करोत्यनुकूलं वातं । वरं देहसु-
खावहं ॥ ७८ ॥ प्रचंडप्रतिकूलोऽपि । चतुर्दिक्षु यथारुचि ॥ ईप्सितो यादृशो वायु-स्तादृगु-
त्पद्यते ततः ॥ ७९ ॥ देदीप्यमानमाकाशे । रत्नं पंचमकं पुनः ॥ सर्वांधकारहर्तृ स्या-त्तथा
वस्त्रप्रदायकं ॥ ८० ॥

तत एतैर्महारत्नै—रुपकारं कुरु स्वयं ॥ यदि नायांति वेलायां । कार्ये तत्संग्रहेण किं
॥ ८१ ॥ इति प्रियावचः श्रुत्वा । कुमारो हृष्टमानसः ॥ कर्पूरागरुकस्तूरी-भोगैः पुष्पैः फ-
लादिभिः ॥ ८२ ॥ संपूज्य जलदं रत्नं । कूपस्तंभे बबंध सः ॥ मेघवृष्टिस्तदैवाशु । संजाता
मिष्टवारिदा ॥ ८३ ॥ युग्मं ॥ प्रपूरितानि सर्वाणि । जलपात्राणि तत्क्षणात् ॥ दृष्ट्वा रत्न- ॥ १९ ॥
स्य माहात्म्यं । हृष्टाः सांयात्रिका अपि ॥ ८४ ॥ एकदा सर्वधान्येषु । प्रक्षीणेषु कुमारराट्॥
धान्यानि पूरयामास । पृथ्वीरत्नप्रभावतः ॥८५॥ पुनरप्येकदा धान्य-पाकयोग्येंधनक्षये ॥

बुभुक्षया क्षामकुक्षीन् । दृष्ट्वा सांयात्रिकान् बहून् ॥ ८६ ॥ विनैधांसि विना चाग्निं । वह्नि-रत्नप्रभावतः ॥ सूर्यपाकां रसवतीं । कृत्वा संभोजिता जनाः ॥ ८७ ॥ मदालसा पुनः प्राहे–कदा दातृशिरोमणे ॥ प्राणनाथ प्रदेहि त्वं । वस्त्रदानं महत्वकृत् ॥ ८८ ॥ सांयात्रिकाणां सर्वेषां । ददौ वस्त्राण्यथोत्तमः ॥ यतः पुण्यवतां सर्वे । सिद्धिं यांति मनोरथाः ॥ ८९ ॥ एवं सर्वेऽपि नौलोका । भोजनाछादनादिभिः ॥ सुखिनो विहितास्तेन । किमसाध्यं महात्मनां ॥ ९० ॥ कुमार एव सर्वेषा–मुपकारिशिरोमणिः ॥ सेवनीयोऽभवद्येन । स्वार्थसिद्धिर्गरीयसी ॥ ९१ ॥ समुद्रदत्तः पापीया–नकृतज्ञशिरोमणिः ॥ मर्यादावर्जितस्त्यक्त—लज्जः सज्जः कुकर्मणि ॥ ९२ ॥ महत्त्वं श्रीकुमारस्या–ऽसहिष्णुः पुनरन्यदा ॥ कुमारं क्षिप्तवानब्धौ । स्त्रीरत्नस्य जिघृक्षया ॥ ९३ ॥ युग्मं ॥ लोकैः कोलाहलश्चक्रे । रुरोद च मदालसा ॥ रे दुरात्मन् विधे कस्ते–ऽपराधो विहितो मया ॥ ९४ ॥ किंकर्त्तव्यविमूढा सा । संजाता मरणोन्मुखी ॥ दासी प्राह मदाधार–भूते स्वामिनि किं मुधा ॥ ९५ ॥ किमर्थं बालमरणं । क्रियते साहसात्त्वया ॥ जिनागमे निषिद्धं त–न्न कर्त्तव्यं विचक्षणैः ॥ ९६ ॥ समुद्रदत्तोऽपि

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

माया–वचनैरधुना त्वया ॥ शीलरक्षाकृते हंत । विप्रतार्यः स्मरातुरः ॥ ९७ ॥ वायुरत्नप्रभावेण । स्वाभीष्टे गम्यते तटे ॥ यथा मिलति ते भर्त्ता । कदाचित्कर्मयोगतः ॥ ९८ ॥ आत्महत्यामहत्पापं । न कर्त्तव्यं त्वयाधुना ॥ त्वत्पतेः कोऽपि भविता । जीवनोपाय एव हि ॥ ॥ ९९ ॥ हंतारं सर्वविपदां । कर्त्तारं सुखसंपदां ॥ परमेष्टिमहामंत्रं । सर्वपापहरं स्मर ॥ ॥ १०० ॥ यतः—

अडविगिरिरणमज्झे । भयं पणासेइ समरिउ मंतो ॥
रक्खइ भवियसयाइं । माया जह पुत्तभंडाइं ॥ १ ॥

यद्दूरं च दुराराध्यं । यच्च दूरे व्यवस्थितं ॥ तत्सर्वं तपसा साध्यं । तपस्तेन विधीयतां ॥ २ ॥ कदाचित्कर्मयोगेन । जीवन् मिलति ते पतिः ॥ अविमृश्य कृतं कार्यं । पश्चात्तापाय जायते ॥ ३ ॥ न चाऽभाव्यं भवत्येव । नो नाशो भाविनो भवेत् ॥ पत्युरमिलने चांते । दीक्षा ग्राह्या त्वयार्हती ॥ ४ ॥ श्रुत्वेति वचनं सख्या । हृष्टा चक्रे तथैव सा ॥ इतो दयापरो वीरः । श्रीउत्तमकुमारराट् ॥ ५ ॥ समुद्रे पतितो यावद्–ग्रस्तो मत्स्येन तावता ॥ वे-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

लाहतस्तटं प्राप्तो । मीनः पुण्यानुभावतः ॥ ६ ॥ मांसाभिलाषिभिर्दृष्टो । धीवरैस्तावता ति-
भिः ॥ विनाशितस्त्वसौ तीक्ष्ण-कुठारैः शठशेखरैः ॥ ७ ॥ जीवन् भिन्नोदरात्तस्य । नि-
स्ससार कुमारकः ॥ कुठारास्तस्य नो लग्ना । जीविते सबले सति ॥ ८ ॥ इतः समुद्रदत्ते-
न । पोतानि प्रेरितान्यपि ॥ इप्सितद्वीपमार्गेषु । न यांति कथमप्यहो ॥ ९ ॥ मदालसावा-
युरत्न-समुत्पादितवायुना ॥ दिनद्वयेन प्राप्तानि । यत्रास्ते स कुमारराट् ॥ १० ॥ मोढप-
ल्लीनामधेयं । वेलाकूलं तदुच्यते ॥ नरवर्माभिधस्तत्र । राजास्ति परमार्हतः ॥ ११ ॥ स
च धार्मिकधौरेयः । षडावश्यककर्मकृत् ॥ सप्तक्षेत्र्यां वपन् वित्तं । सफलां कुरुते जनिं ॥
॥ १२ ॥ इतः समुद्रदत्तोऽपि । प्रौढप्राभृतसंयुतः ॥ मदालसां पुरस्कृत्य । पोतादुत्तीर्य सत्वरं
॥ १३ ॥ ननाम च नराधीशं । प्रातःकाले सभास्थितं ॥ राजा संभाषयामास । कुशलाला-
पपूर्वकं ॥ १४ ॥ युग्मं ॥ सर्वांगसुभगाकारा । सर्वाभरणभूषिता ॥ अन्यनारीरूपगर्व-हरा
केयं कुलांगना ॥ १५ ॥ सोऽवदत्पतिरस्याश्च । समुद्रे पतितो मृतः ॥ निःस्वामिकमिदं स्वा-
मिन् । स्त्रीरत्नं जगृहे मया ॥ १६ ॥ एषा स्त्रीः क्रियमाणापि । पुरा प्रोक्तवती मम ॥ रा-



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ज्ञः कस्यचिदादेशा–न्नजिष्ये त्वत्कलत्रतां ॥ १७ ॥ राज्ञः समक्षं यत्कार्यं । कृतं तन्नान्यथा न्नवेत् ॥ एषा समीहते नाथ । तवादेशमिहागता ॥ १८ ॥

॥ ३३ ॥ इति श्रेष्ठिवचः श्रुत्वा । कोपाटोपसमन्विता ॥ मदालसा जगादाथ । श्रेष्ठिनं सर्वसाक्षिकं ॥ १९ ॥ रे पापिष्ठ महादुष्ट । किमलीकं प्रजल्पसि ॥ श्राः शांतं पापमित्येत–दश्रोतव्यं वचस्तव ॥ २० ॥ पिधाय कर्णौ हस्ताभ्यां । लज्जयाधोमुखी स्थिता ॥ सोवाच सागरेऽनेन । क्षिप्तो राजन् धवो मम ॥ २१ ॥ परस्त्रीलंपटस्यास्य । दर्शने पातकं न्नवेत् ॥ पारदारिकचौराणां । शिक्षादाता त्वमेव हि ॥ २२ ॥ न्यायनिष्ठेन रुष्टेन । राज्ञा पोतस्थितं धनं ॥ ही ही समुद्रदत्तस्य । सकलं जगृहे ततः ॥ २३ ॥ कारागारे चौरमध्ये । क्षिप्तो दुःखं स जीवति ॥ यादृशं क्रियते कर्म । तादृशं भुज्यते फलं ॥ २३ ॥ राजा मदालसां प्राह । खेदः कार्यस्त्वया न हि ॥ शीलप्रन्नावतः सर्वं । न्नद्रमेव न्नविष्यति ॥ २४ ॥ त्रिलोचनाया मत्पुत्र्याः । सार्द्धं प्रीतिपरायणा ॥ न्नगिनीत्वं प्रपद्यस्व । मत्पुत्रीद्वितीयोपमा ॥ २५ ॥ सप्तन्नौमिकसौधेऽस्मिन् । सुखेन स्वसखीयुता ॥ तिष्ठ मिष्टान्नपानादि–भुंजाना च निजेच्छया ॥ ३३ ॥

॥ २६ ॥ दीनादिभ्यो देहि दानं । कुरु ध्यानं तपोऽपि च ॥ नूनं क्वापि तटे लग्नो । भविता
हि भर्त्ता तव ॥ २७ ॥ तच्छुद्धिं च करिष्यामि। सर्वतश्चरमोचनात् ॥ मदालसेति विश्वास्य।
॥ २४ ॥ भूपेन स्थापिता सुखं ॥ २८ ॥ सतीजनोचितान् भर्त्तु–र्वियोगाद्धर्मकारिणी ॥ जगृहेऽभि-
ग्रहान् कांश्चि–त्तद्यथा कथ्यते स्फुटं ॥ २९ ॥ भर्त्ता न मिलते याव–द्धरायां शयनं तथा ॥
त्याज्यानि रक्तवस्त्राणि । पत्रपुष्पफलानि च ॥ ३० ॥ देहशोभा न कर्त्तव्या । नैव धार्यं च
भूषणं ॥ तैलाभ्यंगनिषेधश्च । जलस्नानं तु कारणे ॥ ३१ ॥ शृंगारोचितवाक्यानि । क्रीडाहा-
स्यवचांसि च ॥ विभूषार्थं शरीरस्य। मलापनयनं तथा ॥ ३२ ॥ शर्करां पायसं दुग्धं। दधि
खंडगुडौ घृतं ॥ शुष्कार्द्राणि च शाकानि । पक्वान्नं मोदकादिकं ॥ ३३ ॥ एवमादि परित्य-
ज्य । रुक्षाहारं करोति सा ॥ यतो हि सरसाहारे । दुष्करं शीलपालनं॥ ३४ ॥ एकासनेन
भोक्तव्यं । प्राणधारणहेतवे ॥ शरीरमाद्यं धर्मस्य । साधनं येन कथ्यते ॥ ३५ ॥ विवाहा- ॥ २४ ॥
दिषु कार्येषु । न गंतव्यं मया क्वचित् ॥ निर्गंतव्यं गृहान्नैव । कौतुकादिदिदृक्षया ॥ ३६ ॥
गवाक्षेषु न तिष्ठामि । सखीभिः सह लीलया ॥ बहाग्रहेऽपि लोकानां । न भोक्तव्यं गृहे

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

परे ॥ ३७ ॥ हावभावादि कुर्वाणां । बह्वाभरणभूषितां ॥ परांगनां च दासीं च । न पश्या-
मि परांगनां ॥ ३८ ॥ चतुःप्रकारां विकथां । न श्रोष्यामि स्वकर्णयोः ॥ शृंगाररससंबद्धं ।
न शृणोमि सुभाषितं ॥ ३९ ॥ वैराग्यरससंयुक्तां । गाथां काव्यं विशेषतः ॥ श्रोष्यामि येन
पापानि । त्रुट्यंति सकलान्यपि ॥ ४० ॥ चक्षुषापि न पश्यामि । सालंकारं नरं परं ॥ शी-
लमेव परं तत्वं । ध्यायामि मनसानिशं ॥ ४१ ॥ राजपुत्र्या समं सम्यग् । प्रीतिभावं वित-
न्वती ॥ एकांत धर्मसंलीना । करिष्ये काललंघनं ॥ ४२ ॥

तस्मिन्नवसरे तत्र । सर्वे ते धीवरा अथ ॥ श्रीउत्तमकुमारेण । सह केनापि हेतुना ॥
॥ ४३ ॥ मोढपल्लीमहावेला–कूले सद्यः समागताः ॥ तदा च नरवर्मस्य । राज्ञो यास्ति त्रि-
लोचना ॥ ४४ ॥ पुत्री तस्याः कृते प्रौढः । प्रासादः सप्तभूमिकः ॥ विज्ञानिभिः सूत्रधारैः
। क्रियमाणोऽस्ति सुदरः ॥ ४५ ॥ त्रिभिर्विशेषकं ॥ कुमारस्तत्र संप्राप्तः । पुरशोभां विलो-
कयन् ॥ बहुशास्त्रार्थपारीणो । वास्तुविद्याविशारदः ॥ ४६ ॥ सूत्रधारैः समं वार्त्ता–गोष्ठीं
तेन प्रकुर्वता ॥ तेभ्यश्च कश्चितं ग्राह्यं । भवद्भिर्वचनं मम ॥ ४७ ॥ भित्त्यासन्नो भारपट्टः ।

४

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्तंजयुक्तो विधीयते ।। भित्तिपातेऽपि मेघेन । मंदिरं नो पतेत्ततः ।।४८।। प्रदीपस्यालको भी-
त्यां । क्रियते चेत्तदा पुनः ।। सर्वगेहे प्रकाशः स्यात् । सदा मंगलकारकः ।। ४९ ।। वक्रद्वा-
रकृतश्चात्रा—लको जालिकया सह ।। कीलिकादिप्रयोगेण । चौराणामप्यगोचरः ।। ५० ।। ति-
र्यग्मुखी जालिका चे—दत्र स्थाने विधीयते ।। ग्रीष्मकाले तदा वातः । समायाति सुखाव-
हः ।। ५१ ।। दृष्टिपातोऽन्यगेहेषु । न भवेदुत्तरोन्मुखः ।। गवाक्षः क्रियतामेवं । दृश्यते च च-
तुष्पथः ।। ५२ ।। ऊर्ध्वं शुष्कं भवेत्काष्ठं । न सुखाय निवासिनां ।। वक्रस्तंभान्विता भूमिः।
संपदां न सुखप्रदा ।। ५३ ।। तच्चातुर्येण संतुष्टाः । सूत्रधारा मुहुर्मुहुः ।। प्रशंसंति नरोऽयं
हि । विश्वकर्मावतारकः ।। ५४ ।। इति ज्ञात्वा ततः सर्वैः । सूत्रधारैः कुमारराट् ।। समीपे
स्थापितः सम्यग् । विद्याशिक्षणहेतवे ।। ५५ ।। भृशं संशोध्यमानोऽपि । धीवरैः सकले पुरे।।
कुमारः क्वापि नो दृष्टो । वार्द्धौ पतितरत्नवत् ।। ५६ ।। हा महापुरुषः क्वापि । गतः सोऽ-
स्मदभाग्यतः ।। इति स्वनिंदां कुर्वाणाः । स्वस्थानं धीवरा गताः ।। ५७ ।।

अन्यदा स्वसुतासौधं । विलोकयितुमागतः ।। कुमारं ददृशे राजा । रूपसौभाग्यभासु-



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रं ॥ ५८ ॥ दध्यौ राजा मनस्येवं । रूपलक्षणसंयुतः ॥ उत्तमान्वयसंजातः । कोऽप्ययं रा-
जपुत्रकः ॥ ५९ ॥ तदस्मै राजपुत्राय । प्रदाय रूपशालिनीं ॥ त्रिलोचनां वरां कन्यां । नि-
श्चिंतोऽहं भवाम्यथ ॥ ६० ॥ ततः कुमारमाकार्य । महेन महता ददौ ॥ सुमुहूर्त्ते निजां
कन्यां । वल्लभां प्राणतोऽपि सः ॥ ६१ ॥ भुंजानो विषयान् स्वैरं । पंचेंद्रियमनोरमान् ॥
दोगुंदकाख्यनाकीव । निमग्नः सुखसागरे ॥ ६२ ॥ पूर्वपुण्यानुभावेन । कृतपाणिग्रहोत्सवः
॥ तस्मिन्नेव महावासे । तस्थावनुभवन् सुखं ॥ ६३ ॥ युग्मं ॥

इतश्चावसरे प्राह । दासींप्रति मदालसा ॥ अद्यापि प्राणनाथस्य । शुद्धिः क्वापि न ल-
भ्यते ॥ ६४ ॥ समुद्रे पतितस्यास्य । जाने जातममंगलं ॥ मया दत्तानि दानानि । दीना-
नामप्यनेकशः ॥ ६५ ॥ कृतानि नीरसाहारै-राचाम्लादितपांस्यपि ॥ ध्यातं च बहुधा ध्या-
नं । जिनानां गतकर्मणां ॥ ६६ ॥ उत्तुंगतोरणा नव्याः । प्रासादाः श्रीमदर्हतां ॥ प्रतिमाः
कारिताः स्वर्ण-रूप्यरत्नमया अपि ॥ ६७ ॥ जिना विविधपूजाभि-स्त्रिकालं पूजिता अपि ॥
तदग्रे नाट्यमीतादि-भावना भावितानिशं ॥ ६८ ॥ यथेष्टं विधिना शुद्धा-हाराद्यैः प्रतिलंभि-

॥ २७ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ताः ॥ साधवः शुद्धचारित्र–धारिणः पापहारिणः ॥ ६९ ॥ साधर्मिकाणां सम्यक्त्व–द्वादश-
व्रतधारिणां ॥ वात्सल्यानि कृतान्येव । प्रत्यहं भक्तिपूर्वकं ॥ ७० ॥ पारणानि प्रदत्तानि ।
पौषधव्रतधारिणां ॥ विशेषतः कृता भक्तिः । सर्वेषां ब्रह्मचारिणां ॥७१॥ अंगोपांगादिकाः स-
र्वे । लेखिताः श्रीजिनागमाः ॥ विशाला धर्मशाला च । कारितातिमनोहरा ॥ ७२ ॥ एवं
च निरतीचारः । सम्यगाराधितो मया ॥ दानशीलतपोभावैः । श्राद्धधर्मो विशेषतः ॥७३॥
मनोरथैरियान् कालो । गमितो भर्तृवांछया ॥ कुर्वेऽथाहं मनोऽभीष्टं । खेदः कार्यस्त्वया न
हि ॥ ७४ ॥ त्रिलोचनायै मत्सख्यै । दत्वेदं रत्नपंचकं ॥ त्वयासह ग्रहीष्येऽहं । दीक्षां श्री-
पारमेश्वरीं ॥ ७५ ॥ दास्याह दीक्षाकार्यं च । विचार्यैव हि क्रियते ॥ अविचार्यकृतं कार्यं ।
पश्चात्तापाय जायते ॥ ७६ ॥ स्थिरा भव विषादं त्वं । माकार्षीरधिकाधिकं ॥ यतो वैदेशि-
कः कोऽपि । जातो राजसुतापतिः ॥७७॥ स तु सर्वकलादक्षः । शास्त्रज्ञानां शिरोमणिः॥
त्रिकालज्ञानवेत्ता च । लोकेषु श्रूयतेऽधुना ॥ ७८ ॥ कदाचिद्दैवयोगेन । भर्त्ता तेऽयं भविष्य-
ति ॥ यतस्तादृग्गुणैर्युक्तो । नान्यः कोऽपि जगत्यपि ॥ ७९ ॥ त्वमादिशसि चेन्मह्यं । तदा



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गत्वा त्रिलोचनां ॥ संभाष्य कुशलालापै-स्ततः पश्यामि तत्पतिं ॥ ७० ॥ मदालसाऽप्यनु-
ज्ञाता । गत्वा साह त्रिलोचनां ॥ सखि ते फलितं भाग्यं । यत्प्राप्तः सुगुणी वरः ॥ ७१ ॥
प्रीतिगोष्ठीं विधायैवं । क्षणमेकं परस्परं ॥ साह तां वरसौभाग्यं । त्वत्पतिं मम दर्शय ।७२।
गवाक्षेऽस्मिंस्तया प्रोक्तं । सुप्तोऽस्ति मम वल्लभः ॥ इत्याकर्ण्य वचस्तस्या । वृद्धा तत्र स-
मागता ॥ ७३ ॥ सुप्तस्याथ वपुस्तस्य । दृष्ट्वातीवमनोहरं ॥ तयाचिंत्युत्तमेनायं । सदृशो
हि विलोक्यते ॥ ७४ ॥ व्याघुट्याथ गृहं प्राप्ता । सखीं साह मदालसां ॥ तवैवैनं पतिं
जाने । निश्चितं रूपलक्षणैः ॥ ७५ ॥ ततो मदालसा तस्य । श्रुत्वा रूपादिवर्णनं । स्वभर्तृ-
बुद्ध्या संजाता । क्षणं तदनुरागिणी ॥ ७६ ॥ पुनर्वालितचित्ता सा । चिंतयामास मानसे ॥
परभर्तरि संजातो । रागो मम धिगस्त्वतः ॥ ७७ ॥ भवंति सदृगाकारा ॥ युवानो हि स-
हस्रशः ॥ एवं चेत्क्रियते रागः । सतीत्वं तत्पलायितं ॥ ७८ ॥ सरागमनसा ध्यातः । सती-
नां हि परो नरः ॥ महापातकबंधाय । भवेदुक्तं जिनागमे ॥ ७९ ॥ एवं रागवशप्राप्तं । नि-
निंदात्मानमुच्चकैः ॥ धर्मध्यानैकसंलीन-चित्ता जाता मदालसा ॥ ८० ॥



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अथ च प्रोचिवानेवं । कुमारोऽपि त्रिलोचनां ॥ वृद्धा नारी प्रिये कैषा। किमर्थं च समागता ॥ ए१ ॥ मां निरीक्ष्य गता कुत्र । त्वरितं भ्रांतमानसा ॥ पुनः किं वलितग्रीवा । संजाता हृष्टलोचना ॥ ए२ ॥ सा प्रोचे प्राणनाथैषा । वार्त्ता कौतुककारिणी ॥ सोऽवक् तत्कथ्यतां भद्रे । ममाप्यस्ति कुतूहलं ॥ ए३ ॥ मत्तोऽप्यधिकरूपश्री-र्विदेशात्काचिदागता ॥ प्रमदा या मया पूर्वं । भगिनीति च स्वीकृता ॥ ए४ ॥ सा भर्त्तुर्वियोगे च । दुःखदग्धाप्यहर्निशं ॥ एकांते तिष्टति प्रायो । धर्मध्यानैकमानसा ॥ ए५ ॥ दीनादीनां बहुद्रव्य-प्रदानं कुरुते सदा ॥ एतावत्तु धनं क्वापि । गृहे तस्या न दृश्यते ॥ ए६ ॥ इत्याद्यपूर्ववृत्तांता । भगिनी मम वर्त्तते ॥ एषा वृद्धा सखी तस्या-स्त्वां दृष्ट्वा च पुनर्गता ॥ ए७ ॥ एवं श्रुत्वा कुमारोऽपि । क्षणं रागातुरोऽजनि ॥ एतद्गुणयुता नूनं । भविष्यति मदालसा ॥ ए८ ॥ अथवा सुंदराकारा । नार्यः संति गृहे गृहे ॥ परस्त्रीरागिणं मां धिग् । निनिंदेति च स स्वकं ॥ एए ॥ तस्मिन्नवसरे भूप-पुत्रः श्रीउत्तमाभिधः ॥ मध्याह्ने जिनपूजार्थं । गृहीत्वा पुष्पचंदने ॥ ३०० ॥ आत्मीयमंदिरासन्न-प्रासादे भक्तिपूर्वकं ॥ गतस्ततो न केनापि । दृष्टः

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सोऽथ कुमारराट् ॥ १ ॥ युग्मं ॥ ततस्त्रिलोचना दुःख—पूरसंपूरिता सती ॥ विलापं कुरुते बाढं । तद्वियोगान्मुहुर्मुहुः ॥ २ ॥

अथ तत्रैव नगरे। समस्तगुणसागरः॥ धनी महेशदत्ताख्यो । वर्त्तते वणिजां वरः ॥३॥ षट्पंचाशन्निधानेषु । षट्पंचाशत्कलांतरे ॥ षट्पंचाशच्च वाणिज्ये । संति तत्स्वर्णकोटयः ॥ ॥ ४ ॥ शतानि पंच पोतानां । हट्टानां शतपंचकं ॥ गृहाणां गोकुलानां च । शकटानां तथैव च ॥ ५ ॥ गजाश्ववरयानानां । प्रत्येकं शतपंचकं ॥ सद्वृक्षवाटिकानां च । तथैव शतपंचकं ॥ ६ ॥ वणिक्पुत्रसुवादित्र—श्रीकरीसुन्नटा अपि ॥ शतपंचमिता ज्ञेयाः । पंचलक्षाश्च सेवकाः ॥ ७ ॥ एवमस्ति गृहे तस्य । परिपूर्णं घनं धनं ॥ गतेऽपि यौवने तस्य । न पुत्रो न च पुत्रिका ॥ ८ ॥

एवं चिंतातुरस्यास्य । कालेन कियता पुनः ॥ संजाता पुत्रिका चैका । रूपलावण्यभासुरा ॥ ९ ॥ सा सहस्रकला नाम्ना । चतुःषष्टिकला अपि ॥ क्रमेण यौवनं प्राप्ता । युवतीजनमंडनं ॥ १० ॥ पिता चिंतातुरो जातः । कस्यैषा दीयते कनी ॥ सम्मानरूपलावण्यो।

वरः पुण्येन लभ्यते ॥११॥ वरं विलोकयत्येष । गेहे गेहे पुरे पुरे ॥ परं तादृग्गुणैर्युक्तो । वरः
क्वापि न लभ्यते ॥१२॥ कोऽपि नैमित्तिकः पृष्टः । पित्रा विनयपूर्वकं ॥ मत्पुत्र्याः को व-
रो भावी । तेनोक्तं श्रूयतां विभो ॥ १३ ॥ शुद्धिस्त्रिलोचनाभर्तु-र्यः कर्त्ता राजपर्षदि ॥ म-
दालसाया वृत्तांतं । मूलतः कथयिष्यति ॥ १४ ॥ त्वत्पुत्र्याः स वरो ज्ञेयो । मासांते च मि-
लिष्यति ॥ भावी राजाधिराजश्च । प्रतापाक्रांतभूतलः ॥ १५ ॥ सर्वां विवाहसामग्रीं । कुरु
श्रेष्टिन् शनैः शनैः ॥ संदेहः सर्वथा नात्र । कार्ये कार्यो मनागपि ॥ १६ ॥ ततो महेशदत्ते-
न । जगृहे बलवत्तरं ॥ लग्नं हृष्टेन मासांते । शोधितं पंडितोत्तमैः ॥ १७ ॥ कारिता मंडपाः
प्रौढा । मिलंते स्वजना घनाः ॥ तोरणान्यपि बद्धानि । चित्रितं सकलं गृहं ॥१८॥ नाना-
धवलगीतानि । गायंति स्वजनांगनाः ॥ वंशाश्च कलशाश्चैव । मेलिता वेदिकाकृते ॥ १९ ॥
वरयोग्यानि नव्यानि । पट्टकूलांबराणि च ॥ कार्यंते रत्नबद्धानि । सुवर्णाभरणान्यपि ॥२०॥
जात्याश्वगजयानादि । यद्देयं करमोचने ॥ संगृह्य सकलं मुक्तं । प्रस्तावे यत्सुखावहं ॥२१॥
विस्तृता सकले लोके । वार्त्ता कौतुककारिणी ॥ वरं विना विवाहो य-न्मंडितो व्यवहारिणा



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

॥ २२ ॥ राजाप्येतत्कथां श्रुत्वा । चिंतयामास मानसे ॥ धन्यो महेशदत्तोऽय–मीदृशे विघ्न-
वे सति ॥ २३ ॥ कन्यां विवाह्य जामातु–र्धनं सर्वं प्रदास्यति ॥ समुत्पन्नसुवैराग्यो। द्रुतं
दीक्षां गृहीष्यति ॥ २४ ॥ युग्मं॥ संसारासारतां चित्ते । वैराग्यरसपूरितः ॥ धारयन् श्रेष्ठि-
वर्योऽसौ । वंदनीयो न संशयः ॥ २५ ॥ ततोऽहमपि जामातुः । शुद्धिं कृत्वा कथंचन ॥
राज्यं दत्वा गृहीष्यामि । दीक्षां पापनिवारिणीं ॥ २६ ॥ ततो महेशदत्तेन । सहैकांते मही-
भुजा ॥ विमृश्यैवं पुरे सर्वे । पटहो दापितो जवात् ॥ २७ ॥ त्रिलोचना महीपाल–पुत्री
पतिवियोगिनी ॥ तस्याः पतिर्गतः क्वापि । तच्छुद्धिं यो वदिष्यति ॥ २८ ॥ परदेशागता
यास्ति । कृता पुत्री मदालसा ॥ आमूलचूलसंबंधं । तस्याश्च कथयिष्यति ॥ २९ ॥ तस्मै
राज्यं प्रदास्यामि । चतुरंगचमूयुतं ॥ श्रीसहस्रकलां कन्यां । महेशोऽपि प्रदास्यति ॥ ३० ॥
मासः प्रांते ततः कोऽपि । पस्पर्श पटहं शुकः ॥ सोऽवक्च श्रूयतां लोका । मामकीनमिदं
वचः ॥ ३१ ॥ मां लात्वा यांतु नृपस्य । सभायां प्रकटं यथा ॥ जामातुः क्षितिनाथस्य ।
वृत्तांतं मूलतो ब्रुवे ॥ ३२ ॥ ततो मदालसायाश्च । वृत्तांतं कथयाम्यहं ॥ येनाहं विपुलं रा-



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ज्यं । लप्स्ये कन्यां गुणाधिकां ॥ ३३ ॥ प्रादुर्बभूव मे भाग्यं । फलिताश्च मनोरथाः ॥ तिर्यक्त्वेऽपि यतो राज्यं । प्राज्यं मे च मिलिष्यति ॥ ३४ ॥ कौतुकार्त्तैर्जनैस्ताव–दानीतो राजपर्षदि ॥ मनुष्यभाषया स्पष्टं । राज्ञा पृष्टः शुको जगौ ॥ ३५ ॥ बध्ध्वा जवनिकां रम्या–माकारय मदालसां ॥ त्रिलोचनां च त्वत्पुत्रीं । यथा वच्मि कथानकं ॥ ३६ ॥

राजा तद्वचनं श्रुत्वा । हृष्टश्चक्रे तथैव च ॥ कथं जानासि भो भद्र । तिर्यक्त्वे ज्ञानवर्जितः ॥ ३७ ॥ सोऽवक् त्रिकालवेत्ताहं । यदि चेत्तव कौतुकं ॥ सावधानतया सर्वं । वृत्तांतं श्रूयतामथ ॥ ३८ ॥ वाणारस्यां महापुर्यां । राजा श्रीमकरध्वजः ॥ तस्य पुत्रो महाशूरः । श्रीउत्तमकुमारराट् ॥ ४१ ॥ नानादेशगताश्चर्य–दर्शनार्थं स्वमंदिरात् ॥ निस्ससार स्वभाग्यस्य । परीक्षार्थं स साहसी ॥ ४२ ॥ कियद्भिर्दिवसैः प्राप्तो । भृगुकच्छाभिधे पुरे ॥ पोतमारूढवांस्तत्र । मुग्धद्वीपदिदृक्षया ॥ ४३ ॥ इतः कियद्भिर्दिवसै–र्वार्धिमध्ये समाययौ ॥ जलकांतमयस्तत्र । पर्वतो वर्त्तते महान् ॥ ४४ ॥ तन्मध्ये वर्त्तते कूपः । सुधास्वादुजलैर्भृतः ॥ अगाधो राक्षसेशेन । कृतो भ्रमरकेतुना ॥ ४५ ॥ जलार्थी साहसं कृत्वा । तन्मध्ये स स-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मागतः ॥ ददर्श रूपसौभाग्य–युतां तावन्मदालसां ॥ ४६ ॥ तत्र गांधर्वविधिना । विवाह-
स्तेन निर्मितः ॥ तया सह ततः शीघ्रं । निर्गतः स प्रियान्वितः॥ ४७ ॥ ततः समुद्रदत्तस्य
। पोतमारूढवान् वरं ॥ पंचरत्नप्रभावेण । जलधान्यधनादिभिः ॥ ४८ ॥ समस्तपोतलोकां-
श्च । चकार सुखिनस्ततः ॥ अयं चिंतामणिर्लब्ध–इति लोकैः प्रशंसितः ॥ ४९ ॥ इतः स-
मुद्रदत्तेन । पापिष्टेन दुरात्मना ॥ पातितोऽब्धावसौ रामा–धनलोभांधचेतसा ॥ ५० ॥ ता-
वत्स तिमिना ग्रस्त–स्तिमिश्च तटमागतः ॥ निष्कासितस्तदुदरा–ज्जीवन्नेव स धीवरैः ॥५१॥
निष्पद्यमानमावासं । तव पुत्र्या विलोकयन् ॥ पाणिग्रहं कारितश्च । रूपसौभाग्यवानिति ॥
॥ ५२ ॥ भुंजानः स सुखं स्वैर–मन्यदा श्रीजिनालये ॥ जिनपूजार्थमायातो । धृतपुष्पक-
रंडकः ॥ ५३ ॥ वंशस्य नालिकामेकां । मदनेनातिमुद्रितां ॥ उद्घाटयति तावत्स । दष्ट-
स्तांबूलिकाहिना ॥ ५४ ॥ संजातो नष्टचैतन्यः । पपात वसुधातले ॥ मदालसायास्त्वत्पु-
त्र्या–श्चेति वृत्तं मयोदितं ॥ ५५ ॥ सत्यप्रतिज्ञश्चेत्तर्हि । त्वं हि राज्यं प्रदेहि मे ॥ स्वोक्त-
निर्वाहिका एव । भवंति पुरुषोत्तमाः ॥ ५६ ॥ व्यवहारिसुतां तां चा–ग्रेसरीं भूप कारय ॥



P. P. Ac. Gunratnasuri M.S.                    Jin Gun Aaradhak Trust

पाणिग्रहोत्सवे येन । त्वदुक्तं सफलं भवेत् ॥ ५७ ॥ यतः—

अलसायंते णवि सज्जणेण । जे अरकरा समुल्लविया ॥
जे पत्थरटंकोक्कीरा । न हु ते अन्नहा हुंति ॥ ५८ ॥

त्वरितो भव भूनाथ । विलंबं मा कृथा वृथा ॥ पटहोद्घोषणा वार्त्ता । सर्वापि कथिता मया ॥ ५९ ॥ तिर्यक्त्वेऽपि यथा राज्यं । लीलया स्वेच्छयापि च ॥ करोमि त्वत्प्रसादेन । कियंतं कालमादरात् ॥ ६० ॥ इत्युक्त्वा मौनमाधाय । राज्ञोऽग्रे संस्थितः शुकः ॥ राजा प्राह शुकाधीश । वृत्तांतं कथयाग्रतः ॥ ६१ ॥ अथोवाच शुकप्राज्ञो । मया मे पालितं वचः ॥ सत्यं कार्यकरं चैव । वचो जल्पंति पंडिताः ॥ ६२ ॥ नो चेदहं प्रयास्यामि । स्वाश्रयंप्रति सांप्रतं ॥ फलाद्याजीविकोपायं । चिंतयिष्यामि कंचन ॥ ६३ ॥ ज्ञातमेव मया पूर्वं । यत्प्रायो मानवाधमाः ॥ मायाविनो भवंत्येव । सत्यशौचविवर्जिताः ॥ ६४ ॥ जाते स्वार्थे कृते कार्ये । विघटंते भवादृशाः ॥ उड्डीय गच्छन्नित्युक्त्वा । भूमिपेन धृतः करे ॥ ६५ ॥ उवाच राजा वाचाल । शुकराजविदां वर ॥ तुभ्यं राज्यं प्रदास्यामि । मनाक् त्वं धीरतां धर



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

॥ ६६ ॥ अग्रतो वद वृत्तांतं । क्वास्त्युत्तमकुमारराट् ॥ किं जीवति मृतो वाथ । ज्ञानिनां किमगोचरं ॥ ६७ ॥ शुकः प्रोवाच हे राजं–श्चेत्तैलं नो तिले भवेत् ॥ तर्हि किं वालुकायां स्या–त्तैलं भो धरणीपते ॥ ६८ ॥ एतावत्यापि कथया । चेद्राज्यं नैव दास्यसि ॥ तदाग्रे कथिते किं स्यात् । कंठशोषेण मे फलं ॥ ६९ ॥ यदा दास्यसि मे राज्यं । तदाग्रे कथयिष्यते ॥ राजोवाच प्रदास्यामि । राज्यं ते नात्र संशयः ॥ ७० ॥

शुकोऽवक् श्रुणु तद्राजन् । यदा तांबुलिकाहिना ॥ दष्टः स पतितो भूम्यां । सहसा विषमूर्छितः ॥ ७१ ॥ पण्यांगनांगसेनाख्या । रणन्नूपुरधारिणी ॥ केनापि कार्ययोगेन । तदा तत्र समागता ॥ ७२ ॥ विषापहारिरत्नस्य । संसिक्तो वारिणा तदा ॥ जीवितोऽसौ भवात्पश्चा—दानीतो निजमंदिरे ॥ ७३ ॥ चतुर्भूमौ विशालायां । शालायां स्थापितस्तया ॥ सांसारिकं सुखं भुंक्ते । स संप्रति तया सह ॥ ७४ ॥ स्वस्त्यस्तु तेऽधुना राजन् । पूर्यतां त्वन्मनोरथाः ॥ भवंत्यस्मादृशा येन । सदा मंगलपाठकाः ॥ ७५ ॥ स्वछंदचारिणः प्रायः । सर्वेषामुपकारिणः ॥ न वयं परमुखप्रेक्षा–कारिणो व्योमचारिणः ॥ ७६ ॥ क्षमाना-

य मुंच मुंच त्वं । शुकं मां हि निरागसं ॥ न कार्यं मम राज्येन । न चोद्वाहेन किंचन ॥ ॥ ७७ ॥ नूनं वाचालतादोषात् । कंठशोषः कृतो मुधा ॥ मयातोऽसत्यवादिभ्यो । मानवेभ्यो नमो नमः ॥ ७८ ॥ दाक्षिण्यं सर्वथा त्यक्त्वा । पूर्वं गृह्णंति ये धनं ॥ पश्चाद्भवतु यत्किंचि–द्रोगिणः कर्मयोगतः ॥ ७९ ॥ कल्याणमस्तु वैद्येभ्य–स्तेभ्यो ये स्वार्थसाधकाः ॥ कृतेऽपि कार्यं जानंति । ये ते जगति पंचषाः ॥ ८० ॥ दाक्षिण्यवान् महामूर्खो । ह्ययं मल्लक्षणो नरः ॥ कथयित्वा कथां सर्वां । पश्चाद्राज्यं य ईहते ॥ ८१ ॥ राजोवाच शुकाधीश । वैद्यकेऽर्द्धे कृते सति ॥ वैद्यो न लभते गंतुं । न चाप्नोति धनं पुनः ॥ ८२ ॥ वाचालत्वं ततस्त्यक्त्वा । कियत्कालं स्थिरो भव ॥ यावद्विलोकयामस्तं । वरं वेश्यागृहे स्थितं ॥ ८३ ॥ वार्त्तां सम्यक् परिज्ञाय । राज्यं कन्यां च सुंदरां ॥ दास्यामो नात्र संदेह–स्त्वया कार्यः कथंचन ॥ ८४ ॥ शुकः प्राह महाराज । कृते कार्ये यदा तव ॥ अद्यापि निर्णयो नाभू–त्तर्हि किं कथ्यते घनं ॥ ८५ ॥ नृपः प्राह तथाप्यत्र । क्षणमेकं स्थिरो भव ॥ कुर्वे शुद्धिं कुमारस्य । वेश्यागृहगतस्य यत् ॥ ८६ ॥ नृपाज्ञया ततो लोका । गता वेश्यागृहे क्षणात् ॥



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विलोकितं गृहं तस्या । दृष्टो नैव कुमारकः ॥ ८७ ॥ अरे क्वास्ति नरेंद्रस्य । जामाता वद
सांप्रतं ॥ इति प्रोक्ता जनैः सर्वैः। स्थिता सा न्यग्मुखी तदा ॥ ८८ ॥ न ददात्युत्तरं वेश्या।
किमस्याः कथ्यते घनं ॥ विच्छायवदनाः संतो । नृपपार्श्वेऽथ ते गताः ॥ ८९ ॥ स्वरूपं स-
कलं राज्ञः । कथितं तैर्जनैर्जवात् ॥ अतीवगहनं वृत्त–मिदं राज्ञेति चिंतितं ॥ ९० ॥ सम्यग्न
ज्ञायते तत्वं । पृच्छामि शुकमेव तत् ॥ इति विचिंत्य राजा च । पप्रच्छ शुकमेव तं ॥ ९१ ॥
अग्रतो वद वृत्तांतं । त्वत्तः कोऽप्यपरो न हि ॥ एतत्स्वरूपविज्ञाता । मा कुरु काललंघनं ॥
॥ ९२ ॥ मम हस्तान्न मुक्तिस्ते । सर्वप्रकटनं विना ॥ इति श्रुत्वा शुकः प्राह। श्रुणु राज-
न् यथास्थितं ॥ ९३ ॥ सर्वेषामपि लोकानां । प्रमोदो जायते यतः ॥ प्रस्तावे कथितं सर्वं।
भवेदमृतसोदरं ॥ ९४ ॥ अनंगसेना तद्रूप–पुरुषार्थविमोहिता ॥ अयमेव हि भर्त्ता मे । भ-
वेऽस्मिन्नापरो वरः ॥ ९५ ॥ एतादृशं विजानाति । राजा जामातरं यदि ॥ न दत्ते मद्गृहे
स्थातुं । स्वलब्धं केन मुच्यते ॥ ९६ ॥ इतः स्थानाद्गतः क्वापि । पुनर्नैवागमिष्यति ॥ वि-
चिंत्येति तया बद्धः । पादे दवरको मम ॥ ९७ ॥ दवरकोऽसौ मंत्राभि–मंत्रितोऽभूदहं त-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तः ॥ त्यक्त्वा चपलं पुंरूपं । शुकोऽजूत्पंमितोत्तमः ॥ ए७ ॥ प्रसुप्तोऽहं न जानामि । याव-
ज्जागरितः पुनः ॥ तया तूर्णं च निःक्षिप्तः । पंजरे स्वर्णनिर्मिते ॥ ए७ ॥ रंजयामि ततस्तां
च । नव्यश्लोकसुजाषितैः ॥ गुणज्ञोटनतः सापि । पुमांसं कुरुते मम ॥ एए ॥ स्त्रियः किं
किं न कुर्वंति । नूनं रागविमंबिताः ॥ मोहात्परवशोऽहंपि । रमामीह तया सह ॥ ४०० ॥
यतः श्रीशीलोपदेशमालायामप्युक्तं—

हरिहरचजराणाणं । चंदसुराइंदाइणोवि देवा ॥
नारीण किंकरत्तं । करिंति धिद्धी विषयतिएहा ॥ १ ॥

पुनर्दवरकं बध्ध्वा । मां शुकं कुरुते सदा ॥ एवं कियान् गतः कालो । यज्ञाव्यं तज्ञवे-
द्यतः ॥ १ ॥ यतः—

ज्ञवितव्यं ज्ञवत्येव । नालिकेरफलांबुवत् ॥
गंतव्यं गमयत्येव । गजभुक्तकपित्थवत् ॥ २ ॥

इतश्च चिंतितं चित्ते । मानुष्येऽपि ज्ञवे मम ॥ तिर्यक्त्वं किल संजातं । केनापि हि कु-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कर्मणा ॥ ३ ॥ परोपकारनिष्टेन । शिष्टाचारवता मया ॥ विरुद्धं न कृतं किंचित् । पातकं परदुःखदं ॥ ४ ॥ हुं ज्ञातं मयात्रैव । त्र्भवे पातकमर्जितं ॥ मदालसाऽपितृदत्ता । परिणीता मया हहा ॥ ५ ॥ धिगहो राक्षसाऽदत्तं । गृहीतं रत्नपंचकं ॥ न पापीयान्नरः कोऽपि । मत्तु-ल्यो भुवनत्रये ॥ ६ ॥ तेनैव पातकेनाहं । गृहीत्वा मे मदालसां ॥ समुद्रदत्तवणिजा । प्र-क्षिप्तो घोरसागरे ॥ ७ ॥ तदा त्रिलोचनागेहे । प्राप्ता वृद्धांगना यदा ॥ अविज्ञातस्वरूपायां। तत्स्वामिन्यां प्रियाभ्रमात् ॥ ८ ॥ रागबुद्धिर्मया चक्रे । तद्भग्नं पातकं मम ॥ तत्पापयोगा-त्सर्पेण । दष्टोऽहं जिनमंदिरे ॥ ए ॥ शुकत्वं च मया प्राप्तं । पुष्पं पापतरोरिदं ॥ आगमो-क्तं पुनर्न्नावि । फलं नरकवेदना ॥ १० ॥ यतः——

त्र्भक्खणे देवदव्वस्स । परत्थीगमणेण य ॥
सत्तमं नरयं यांति । सत्तवाराउ गोयमा ॥ ११ ॥

विक्रमाक्रांतविश्वोऽपि । परस्त्रीषु रिरंसया ॥ कृत्वा कुलक्षयं प्राप । नरकं दशकंधरः ॥ १२ ॥ स्मारं स्मारं निजं पापं । निनिंद च मुहुर्मुहुः ॥ स्तोकमप्यपराधं स्वं । घनं जा-

६



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नंति पंमिताः ॥ १३ ॥ अनंगसेनारागेण । मासं तत्रैव संस्थितः ॥ गता साद्य बहिर्मे च । मुक्त्वा पंजरमुत्कलं ॥ १४ ॥ निर्गतोऽवसरज्ञोऽहं । विमृश्य खलु पंजरात् ॥ त्रिके चतुष्के सर्वत्र । पटहोद्घोषणं श्रुतं ॥ १५ ॥ जक्कीय स्पृष्टवान् राजन् । स्पष्टवाक् पटहं तव ॥ स एवाहमिति श्रुत्वा । राज्ञाच्छोटि गुणः पदः ॥ १६ ॥ दीव्यरूपधरस्तावत् । साक्षात्कंदर्पसंनिन्नः ॥ स्पष्टरूपः कुमारोऽनूत् । संतुष्टाः सकला जनाः ॥ १७ ॥ तदैव परिणीता च । सा सहस्रकलाकनी ॥ अतीवबहुमानेन । तेन तत्र नृपाज्ञया ॥ १८ ॥ मदालसापि हृष्टाथ । मिलिता च त्रिलोचना ॥ तिसृणामपि नारीणां । संयोगो मिलितस्तदा ॥ १९ ॥ एकचित्ततया तासां । जाता वार्त्ताः परस्परं ॥ अस्मिन् नवे वरो नान्यः । प्रतिज्ञा इति नः खलु ॥ २० ॥ स्थापितानंगसेनापि । नार्यात्वेनानुरागिणी ॥ यतो जगति रामाणां । मोहः स्यादुःसहो नृणां ॥ २१ ॥

इतो नूपस्य जामातु–श्चैत्ये पुष्पाण्यनेकशः ॥ कुमारस्य प्रदत्तानि । वनपालिकया यया ॥ २२ ॥ सा समाकार्य राज्ञापि । तामिता दृढबंधनैः ॥ पृष्टा च वद रे पापे । त्वया पु-



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ष्पकरंमके ॥ २३ ॥ ससर्पनलिका कस्मात् । क्षिप्ता मदनवेष्टिता ॥ सा प्राह श्रूयतां नाथ । सत्यं कारणमुच्यते ॥ २४ ॥ त्रिभिर्विशेषकं ॥ समुद्रदत्तवणिजा । कारागारस्थितेन मे ॥ हेमपंचाशतीदाना—दकार्यं तेन कारितं ॥ २५ ॥ मया लोभांधया नाथ । विहितं पातकं महत् ॥ लोभांधाः किं न कुर्वंति । निर्भया इह पापतः ॥ २६ ॥ वध्यः समुद्रदत्तोऽयं । तथेयं वनपालिका ॥ इत्यादिष्टं रुषा राज्ञा । कुमारेणापि तच्छ्रुतं ॥ २७ ॥ कृपापरतया तेन । मोचितौ तावुभावपि ॥ सापराधेऽपि येन स्युः । श्राद्धाः किल दयालवः ॥ २८ ॥ यतः—दीनं हीनं जनं दृष्ट्वा । कृपा यस्य न जायते ॥ सर्वज्ञभाषितो धर्म—स्तस्य चित्ते न विद्यते ॥ ॥ २९ ॥ राज्ञा सर्वस्वमादाय । देशान्निष्कासितौ तयोः ॥ अत्युग्रपुण्यपापाना—मिहैव फलमाप्यते ॥ ३० ॥ पुराप्युत्पन्नवैराग्यः । संसारासारतां विदन् ॥ राजाथ चिंतयामास । सिद्धांतवचनं यथा ॥ ३१ ॥ यतः—

जरा जाव न पीडेइ । वाही जाव न वड्ढइ ॥
जाविंदिया न हीयंति । ताव धम्मं समायरे ॥ ३२ ॥



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सव्वं विलवियं गीयं । सव्वं नट्टं विडंबणा ॥
सव्वे आभरणा भारा । सव्वे कामा दुहावहा ॥ ३३ ॥
कोऽहं कस्मात्कथमायातः । का मे जननी को मे तातः ॥
इति परिभावयतः संसारः । सर्वोऽयं स्वप्नव्यवहारः ॥ ३४ ॥
तथा—दाराः परभवकारा । बंधुजनो बंधनं विषं विषयाः ॥
कोऽयं जनस्य मोहो । ये रिपवस्तेषु सद्भावः ॥ ३५ ॥
किंच—द्रव्याणि तिष्टंति गृहेषु नार्यो । विश्रामभूमौ स्वजनाः स्मशाने ॥
देहश्चितायां परलोकमार्गे । कर्मानुगो याति स एव जीवः ॥ ३४ ॥
जानामि क्षणभंगुरं जगदिदं जनामि दुष्टं सुखं ।
जानामींद्रियवर्गमेतदखिलं स्वार्थैकनिष्टं सदा ॥
जानामि स्फुरिताचिरद्युति चलं विस्फुर्जितं संपदां ।
नो जानामि तथापि कः पुनरसौ मोहस्य हेतुर्मम ॥ ३५ ॥

 



सत्यं वच्मि हितं वच्मि । सारं वच्मि पुनः पुनः ॥ अस्मिन्नसारे संसारे । सारमात्महितं कुरु ॥ ३६ ॥ एवं वैराग्यतो राजा । गुर्वागमनमीहते ॥ तावता धर्मघोषाख्यः । सुरींद्रोऽपि समाययौ ॥ ३७ ॥ यडुक्तं तेन गुरुणा—

तत्वमिदं भो भविकाः । प्रमादमवधूय कुरुत पुण्यानि ॥ सकलागमसर्वस्वं ॥ सर्वेषां हितकरं चैतत् ॥ ३८ ॥ सर्वत्रापि हि संभवंति बहवः पापोपदेशप्रदाः । लोकोऽपि स्वयमेव पापकरणे बाढं निबद्धादरः ॥ क्वैते सर्वहितोपदेशविशदव्यापारिणः साधवो । यत्संसर्गनिसर्गनष्टतमसस्तुष्यंत्यमी देहिनः ॥ ३९ ॥ न हितं कुरुते माता । न पिता न कलत्रबंधुवर्गश्च ॥ यं कुर्वंत्याचार्या । हितोपदेशेन सत्वानां ॥ ४० ॥ किंच—जं कल्ले कायव्वं । अज्जं चिय तं करेह तुरमाणो ॥ बहुविग्घो हुं मुहुत्तो । मा अवरण्हं पडिक्खेह ॥ ४१ ॥

इति श्रुत्वा गुरोः सार—मुपदेशरसायनं ॥ संजातभवनिर्वेदो । राजा धर्मपरोऽजनि ॥ ४४ ॥ ततः समक्षं लोकानां ॥ पुत्राभावात्प्रदत्तवान् ॥ राज्यं तस्मै कुमाराय । जामात्रे समहोत्सवं ॥ ४५ ॥ अष्टाह्निकामहः कृत्वा । सर्वत्र जिनमंदिरे ॥ साधर्मिकाणां वात्सल्यं । 

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

॥४६॥

चकारासौ सविस्तरं ॥ ४६ ॥ दत्वा दानानि दीनानां । संतोष्य सकलं पुरं ॥ कृतार्थोऽभूत्त-
तो राजा । कृतसर्वव्रतोत्सवः ॥४७॥ ततो महेशदत्तोऽपि । श्रुत्वाभूच्च व्रतोद्यमी ॥ कुटुंबभा-
रमारोप्य । दत्वा च स्वगृहं श्रियं ॥ ४८ ॥ तस्मै भूपाय जामात्रे । यतस्तस्य न पुत्रकः॥
पश्चात्स मिलितो राज्ञो । महाव्रतसमुत्सुकः ॥ ४९ ॥ युग्मं ॥ जगृहाते ततो दीक्षां ।
द्वावपि श्रेष्ठिभूभुजौ ॥ निर्ममौ निरहंकारौ । सर्वथा लोभवर्जितौ ॥ ५० ॥ गीतार्थबालवृ-
द्धानां । वैयावृत्त्यपरायणौ ॥ द्विचत्वारिंशताहार–महादोषविवर्जकौ ॥ ५१ ॥ स्तोककालेन
सिद्धांत–समुद्रस्यावगाहकौ ॥ धर्मध्यानैकसंलीनौ । शुद्धधर्मोपदेशकौ ॥ ५२ ॥ नानाविध-
तपोभेद–कारकौ भवतारकौ ॥ साधुवर्गेषु संप्राप्त–रेखौ कपटवर्जितौ ॥ ५३ ॥ क्रियाकला-
पकुशलौ । शमामृततरंगितौ ॥ जिनाज्ञानिपुणौ शुद्ध–चारित्रप्रतिपालकौ ॥ ५४ ॥ मास-
संलेखनां कृत्वा । केवलज्ञानभास्करौ ॥ अष्टकर्मक्षयं कृत्वा । संप्राप्तौ परमं पदं ॥ ५५ ॥
षड्भिः कुलकं ॥ षष्टिलक्षपलादानां । स्वामी भ्रमरकेतुराट् ॥ तस्मिन्नवसरे सैन्यं । मेल-
यित्वा रुषातुरः ॥ ५६ ॥ त्रिकालचतुरं कंचित् । पप्रच्छ च नैमित्तिकं ॥ स दुष्टश्चौरवन्नष्ट्वा ।

॥४६॥

P. P. Ac. Gunratnasuri M.S.
Jin Gun Aaradhak Trust

गतः क्वास्ति रिपुर्मम ॥ ५७ ॥ युग्मं ॥ सोऽप्यूचे रत्नसंयुक्तां । परिणीय मदालसां ॥ मो-
ढपल्लीनामवेला—कूले स वर्त्ततेऽधुना ॥ ५८ ॥ तत् श्रुत्वा राक्षसो दध्यौ । नान्यथा भवित-
व्यता ॥ अहो महासमुद्रांतः । शैले कृत्वा महावटं ॥ ५९ ॥ वक्रद्वारो मया तत्र । प्रासा-
दो निर्मितो महान् ॥ अगम्यं नाकिनामप्या—स्पदं चक्रे महावटे ॥ ६० ॥ प्रविश्य भूचरे-
णापि । तत्र गुप्तीकृता सुता ॥ परिणीता तथा रत्न—पंचकं प्राणवल्लभं ॥ ६१ ॥ लात्वाधुना
महापापी । मोढपल्ल्यां प्रवर्त्तते ॥ अहो नैमित्तिकज्ञानं । नान्यथा जायते यतः ॥ ६२ ॥
युग्मं ॥ अहो अहो कुमारस्य । पुण्यं पूर्वभवार्जितं ॥ शून्यद्वीपे यदायात । एकाकी बलव-
र्जितः ॥ ६३ ॥ सन्नाहादिविनाप्येवं । जित्वा मां राक्षसं पुनः ॥ स संप्रति महाराज्य—पा-
लकः सुभगाग्रणी ॥ ६५ ॥ पंचरत्नमहिम्ना यो । जेताभून्नाकिनामपि ॥ प्रभूतभटसंसेव्यः।
कथं जेतुं स शक्यते ॥ ६६ ॥ सुतापाणिग्रहे जाते । जामाता हन्यतेऽथ किं ॥ विमुक्तरण-
संरंभोऽ—चिंतयदिति राक्षसः ॥ ६७ ॥ मोढपल्लीनामवेला—कूलमागत्य सत्वरं ॥ मदालसां
सहर्षं च । संभाष्य स्वसुतां ततः ॥ ६८ ॥ श्रीउत्तमकुमारं तु । भूपं नत्वा प्रपद्य च ॥ त-



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दाज्ञामगमल्लंका—पुर्यां हर्षप्रपूरितः ॥ ६९ ॥ तस्मिन्नवसरे राज्ञः । सन्नायां लेखहारकः ॥ कश्चित्समाययावेकः । सलेखो दूरदेशतः ॥ ७० ॥ राजाह कुशलं लेख—हारिन्नत्रोपविश्यतां ॥ सोऽप्याह स्वस्ति ते नृपे—त्युक्त्वा लेखः समर्पितः ॥ ७१ ॥ सर्वे चमत्कृता लोकाः । केनासौ प्रेषितो जनः ॥ अस्य किं वर्त्तते कार्यं । कोऽसौ कथमिहागतः ॥ ७२ ॥ तावता लेपमुन्मुद्य । वाचितः पृथिवीभुजा ॥ सावधानतया सर्वे । शुश्रुवंतिस्म सन्नाजनाः ॥ ७३ ॥

स्वस्ति श्रीसर्वविद्देवं । नत्वा वाणारसीपुरात् ॥ मकरध्वजभूभर्त्ता । समस्तपरिवारयुक् ॥ ७४ ॥ मोढपल्लीनामवेला—कूले मूलेऽखिलश्रियां ॥ श्रीउत्तमकुमाराख्यं । स्वपुत्रं स्नेहपूर्वकं ॥ ७५ ॥ हृदयेन समालिंग्य । गाढं गाढं पुनः पुनः ॥ समादिशति कल्याणं । कुशलं चात्र वर्त्तते ॥ ७६ ॥ स्वीयं ज्ञाप्यं च कल्याणं । सदैवास्मन्मुदे त्वया ॥ विशेषतः पुनर्वर्य—कार्यमेतन्निवेद्यते ॥ ७७ ॥ अस्मद्राज्यस्य सर्वस्वं । वत्स त्वमसि जीवितं ॥ चिरंजीविन्ननापृच्छ्य । कथं निस्सरितो गृहात् ॥ ७८ ॥ विदेशंप्रति हे वत्स । प्रस्थिते त्वयि सत्वरं ॥ पत्तयो लेखहारास्ते । शुद्ध्यै प्रेषिता मया ॥ ७९ ॥ ग्रामे पुरे वने द्वीपे । पर्वते पत्तनेऽ-



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पि च ॥ न प्राप्ता भवतो वार्त्ता । तेनाहमतिदुःखितः ॥ ८० ॥ जनकं जननीं चापि । यन्न
स्मरसि सर्वथा ॥ विनीतानां सुपुत्राणा-मेवं कर्त्तुं न युज्यते ॥ ८१ ॥ महत्त्वं हि महत्प्री-
त्या । पितॄन् प्रीणयति बहु ॥ उल्लासयति चंद्रोऽपि । सागरं स्वोदये न किं ॥ ८२ ॥ दिव-
सा यांति कष्टेन । निष्टां याति न शर्वरी ॥ कालो वियोगतप्ताना-मस्माकं याति दुःखतः ॥
॥ ८३ ॥ राज्यभारधुरं धर्त्तुं । वार्द्धकेनाहमक्षमः ॥ आगच्छ वत्स वेगेन । स्वराज्यं प्रतिपा-
लय ॥ ८४ ॥ घनं किं कथ्यते वत्स । चतुरोऽसि यतः स्वयं ॥ यदि भक्तिस्तवास्मासु । दृ-
ष्ट्वास्मांस्त्वं पयः पिबेः ॥ ८५ ॥ इति लेखस्य तत्वार्थं । वाचयन् स व्यचिंतयत् ॥ वत्सला-
नां हि पितॄणां । जातोऽहं दुःखदायकः ॥ ८६ ॥ अहं तु प्राप्तराज्योऽपि । स्वपित्रोर्वार्द्धकेऽ-
पि हि ॥ सुखाय नाभवं किंतु । महदार्त्तिविधायकः ॥ ८७ ॥ ततः संप्रति गत्वाशु । सुखी-
कुर्वे पितॄनहं ॥ ते पुत्रा ये पितुर्भक्ता । इत्यभून्मिलनोत्सुकः ॥ ८८ ॥ समर्पयित्वा तद्रा-
ज्यं । मंत्रिभ्यः सकलं निजं ॥ पदातिमत्तमातंग-रथकोटिसमन्वितः ॥ ८९ ॥ प्रतस्थे स
पुरीं वाणा-रसींप्रति चतुःप्रियः ॥ प्रयाणैस्त्वरितैश्चित्र-कूटोपांते समाययौ ॥ ९० ॥



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तदा तत्स्वामिना राज्ञा । महासेनेन सत्वरं ॥ आराधयितुमारब्धा । तपसा गोत्रदेवता ॥ ९१ ॥ यच्छाम्यहं ध्रुवं कस्मै । राज्यमेतन्मदीयकं ॥ निःपुत्राणामियं चिंता । महतामपि जायते ॥ ९२ ॥ यतः—अपुत्रस्य गृहं शून्यं । दिशः शून्या अबांधवाः ॥ मूर्खस्य हृदयं शून्यं । सर्वशून्या दरिद्रता ॥ ९३ ॥ संजाते ऽवनिर्वेदे । न मे राज्यप्रयोजनं ॥ देव्या प्रोक्तं महाराज । तव राज्यधुरंधरः ॥ ९४ ॥ श्रीउत्तमकुमाराख्यो । राजा प्रातः समेष्यति ॥ दत्वा राज्यधुरं तस्मै । निजं कार्यं प्रसाधय ॥ ९५ ॥ युग्मं ॥ देवतावचनात्तस्मै । पुत्राऽभावात्प्रदत्तवान् ॥ श्रीउत्तमनरेशाय । स च राज्यं श्रिया युतं ॥ ९६ ॥ जैनीं दीक्षां प्रपद्यासौ । तपःकर्मपरायणः ॥ जातः सर्वगुणाधारः । शांतो दांतो जितेंद्रियः ॥ ९७ ॥ अथ स्थित्वा चित्रकूटे । दिनानि कतिचित्तथा ॥ मेदपाटं महाराष्ट्रं । कर्णाटं मरुमंडलं ॥ ९८ ॥ गुर्जरं मालवं गौडं । लाटं सौराष्ट्रमंडलं ॥ पराक्रमेण स्वायत्ती—कृत्य देशाननेकशः ॥९९॥ सर्वत्र न्यायनिपुणान् । स्थापयित्वा नियोगिनः ॥ गोपाचलमहादुर्गं । क्रमेण प्राप्तवानसौ ॥ ॥ ५०० ॥ त्रिभिर्विशेषकं ॥ तत्रास्ति सिंधुसौवीर—देशस्वामी बलोत्कटः ॥ चतुरक्षौहिणी-



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सेनो । वीरसेनाभिधो नृपः ॥ १ ॥ श्रीउत्तमकुमारस्य । सन्मुखं स समाययौ ॥ संग्रामाय
यतः कोऽपि । स्वाधिकं सहते किमु ॥ २ ॥ मद्देशं च परित्यज्य । ससैन्यो दूरतो व्रज ॥
दूतेनेति ज्ञापितवान् ॥ युद्धे सज्जो भवाथवा ॥ ३ ॥ इति तद्दूतगीःक्रुद्धः । श्रीउत्तमनराधि-
पः ॥ संग्रामसज्जः संजातो । घृतदीप्त इवानलः ॥ ४ ॥ घोरः प्रवृत्तः संग्राम । उभयोरपि
सैन्ययोः ॥ जितमुत्तमकुमारेण । यतो धर्मस्ततो जयः ॥ ५ ॥ जीवन्नेव स्वयं बद्धो । वीर-
सेनो नृपोऽमुना ॥ ग्राहयित्वा निजामाज्ञां । मुक्तश्च स महात्मना ॥ ६ ॥ परं वैराग्यमा-
पन्नो । जितोऽहमिति सत्वरं ॥ स उत्तमकुमाराय । महद्राज्यं प्रदत्तवान् ॥ ७ ॥ तदा बहुप-
रिवाराः । श्रीयुगंधरसूरयः ॥ धर्मोपदेशकुशला । उद्याने समवासरन् ॥ ८ ॥ बहुदानेन सं-
तोष्य । वर्द्धापनिकमागतं ॥ वंदनार्थं गतो राजा । स्वपरिवारसंयुतः ॥ ९ ॥ गिरा मधुरया
धर्मो—पदेशं दत्तवान् गुरुः ॥ श्रूयतां धर्मसर्वस्वं । श्रुत्वा चैवावधार्यतां ॥ १० ॥ यतः—

दुर्लभं भवमवाप्य दक्षिणा—वर्त्तशंख इव भो भवांबुधौ ॥
पूरयेत् सुकृतगांगवारिणा । न प्रमादसुहृदा स चोत्तमः ॥ ११ ॥

एवं धर्मकथां श्रुत्वा । दीक्षां जग्राह सद्गुतं ॥ कियत्काले गते प्राप्तो । निर्वाणं शुद्धधर्म-
कृत् ॥ १२ ॥ प्रस्थितः काशिदेशाय । श्रीउत्तमनरेश्वरः ॥ कियद्भिर्दिवसैः प्राप्तो । वाणारसीं
महापुरीं ॥ १३ ॥ मृदंगशंखवीणादि—झल्लरीमर्दलादिषुः ॥ वाद्यमानेषु वै तेन । प्रवेशो वि-
हितो पुरि ॥ १४ ॥ ननाम च पितुः पादौ । संतोष्य जननीमपि ॥ संभाष्य स्वजनान् स-
र्वा—नाभाष्य नगरीजनान् ॥ १५ ॥ सोत्सवं स्वगृहे प्राप्तो । ददद्दानं यथोचितं ॥ प्राप्यते
पुण्ययोगेन । यतः स्वजनसंगतिः ॥ १६ ॥ मकरध्वजभूपालः । पुत्रमोहविमोहितः ॥ राज्यं
दत्वा कियत्कालं । तस्मै धर्मपरोऽभवत् ॥ १७ ॥ अथोद्याने समाजग्मुः । श्रीगुणधरसूरयः ॥
अज्ञानध्वांतहरणे । सूरयः सर्वधर्मदाः ॥ १८ ॥ उद्यानपालकः शीघ्रं । वर्द्धापयति भूपतिं ॥
सहकारवने स्वामिन् । श्रीगुणधरसूरयः ॥ १९ ॥ गुणाकराः समायाताः । साधुसंघविरा-
जिताः ॥ कुवादिमत्तमातंग—चूरणे सिंहसन्निभाः ॥ २० ॥ युग्मं ॥ ततो राजा प्रहर्षेण ।
सर्वांगाभरणानि तं ॥ दत्वा समुत्थितः शीघ्रं । वंदनार्थं गुरोस्तदा ॥ २१ ॥ सप्तस्थानझर-
दाने । सुरमातंगसन्निभे ॥ दंतावलं समारुह्य । निर्ययौ नगराद् बहिः ॥ २२ ॥ अनुक्रमेण



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

संप्राप्तः । सहकारवने नृपः ॥ प्रदक्षिणास्त्रिस्तिसृभि—र्नत्वा च शिरसा गुरुं ॥ २३ ॥ उप-
विष्टोऽग्र गुरुभि—रारेभे धर्मदेशना ॥ पापतापेन तप्तानां । सुधारससहोदरां ॥ २४ ॥ यथा—
प्रातः काले समुत्थाय । ये वंदंति जिनाधिपं ॥ अनुक्रमेण ते भव्या । लभंते परमं पदं ।२५।
पुनः—सर्वसंगं परित्यज्य । दीक्षां गृह्णंति ये नराः ॥ सप्ताष्टभवमध्ये ते । मोक्षं यांति न सं-
शयः ॥२६॥ श्रुत्वैवं भूपतिर्धर्म—देशनां पापनाशिनीं ॥ प्रतिबुद्धः क्षणाद्दीक्षां । जगृहे मकर-
ध्वजः ॥ २७ ॥

चतुर्णामथ राज्याना—मधीशः श्रावकाग्रणीः ॥ श्रीउत्तमनरेंद्रश्च । सौख्यानि बुभुजे चि-
रं ॥ २८ ॥ रथग्रामगजाश्वानां। चत्वारिंशच्च कोटयः॥ चत्वारिंशच्च पत्तीना—मुष्ट्राणां लक्ष-
पंचकं ॥२९॥ चतुःसहस्रभूपाना—माधिपत्यं स पालयन् ॥ साधर्मिकाणां वात्सल्यं। विधत्ते
पारणादिषु ॥ ३० ॥ युग्मं ॥ उत्तुंगतोरणानेक—जिनप्रासादमंडितां ॥ पृथिवीं कारयामास ।
सत्रागारान् पुरे पुरे ॥ ३१ ॥ शत्रुंजयमहातीर्थे । प्रतिवर्षं करोत्यसौ ॥ अन्येष्वपि च ती-
र्थेषु । यात्रां संघसमन्वितः ॥ ३२ ॥ अष्टादश करा मुक्ताः । सर्वग्रामेषु धीमता ॥ तेषां ना-



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मानि लिख्यंते । श्रीसिद्धांतानुसारतः ॥ ३३ ॥—

गो १ महिसु २ द्द ३ पसूणं ४ । छगलीणं पि य ५ करा मुणेयव्वा ॥
तत्तोणंत ६ पलाले ७ । भुस ८ कट्टंगार ए करमेव ॥ ३४ ॥
सीउं १० बर ११ जंघाए १२ । बल १३ भद्दकरे १४ घय १५ चमेयं १६ ॥
चुल्लग्ग १७ करेय १८ । अट्ठारसमा करुपत्ति ॥ ३५ ॥

दुष्टशिक्षाकरो न्याय—निष्टः शिष्टजनप्रियः ॥ निःकंटकमसौ राज्यं । कुरुते भयवर्जितः ॥ ३६ ॥ सर्वज्ञः सर्वदर्शी च । केवलज्ञानभास्करः ॥ भक्त्या सुरकृतस्फार—सुवर्णकनकासनः ॥ ३७ ॥ अन्यदा पुण्ययोगेन । संप्राप्तो भुवनेश्वरः ॥ वंदनार्थं गतो राजा । श्रुता तद्धर्मदेशना ॥ ३८ ॥

धर्माद्धनं धनत एव समस्तकामाः । कामेभ्य एव सुखमिंद्रियजं समस्तं ॥
कार्यार्थिना हि खलु कारणमेषणीयं । धर्मो विधेय इति तत्वविदो वदंति ॥ ३९ ॥
सत्पात्रं महती श्रद्धा । काले देयं यथोचितं ॥ धर्मसाधनसामग्री । नाल्पपुण्यैरवाप्यते ।४०।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

 



पात्रं सर्वोत्तमं स्याज्जगति यतिगणो मानमायाविमुक्तः ।
श्राद्धाः स्युर्मध्यमं भो जिनपतिगदितं देशचारित्रिणो ये ॥
सम्यक्त्वं चादधाना नुतगुणरहिताः स्याज्जघन्यं तु तस्मै ।
मोहार्थं दीयमानं प्रवरगुणगणापेक्षया स्यात्प्रधानं ॥ ४१ ॥

तथाच—यद्भक्तिः सर्वज्ञे । यद्यत्नस्तत्प्रणीतसिद्धांते ॥ यत्पूजनं यतीनां । फलमेतज्जीवितव्यस्य ॥ ४२ ॥ भवकोटीदुःप्राप्या—मवाप्य नृभवादिसकलसामग्रीं ॥ भवजलधियानपात्रे । धर्मे यत्नः सदा कार्यः ॥ ४३ ॥ अर्थः कामश्च मोक्षश्च । जायेते यत्प्रसादतः ॥ स श्रीधर्मः कथं न स्या—त्करणीयः सतां नृणां ॥ ४४ ॥ इत्यादि, पृष्टं च भगवन् केन । कर्मणा मम संपदः ॥ वाचामगोचरा जाता । महदाश्चर्यकारिकाः ॥ ४५ ॥ विपदोऽपि महाघोराः । कर्मणा केन जज्ञिरे ॥ सम्यगून कोऽपि जानाति । केवलज्ञानिनं विना ॥ ४६ ॥ अवोचत् केवली राजन् । शृणु पूर्वभवार्जितं ॥ संबद्धं यत्त्वया कर्म । भवेऽस्मिन् सुखदुःखकृत् ॥ ४७ ॥



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

। रूपलावण्यभासुराः ॥ ५८ ॥ सुपात्रदानतः सर्वं । त्वया प्राप्तं मनोगतं ॥ दत्तानुमोदितं दानं । भवेत्सर्वं समृद्धये ॥ ५९ ॥ यतः—

अप्पहियमायरंतो । अणुमोअगो य सुग्गइं लहइ ॥
[1]रहकारदाणअणुमोयगोयं । मिगो जह य बलदेवो ॥ ६० ॥

किंच—रामो तवप्पभावा । सुपत्तदाणाउ जत्ति रहकारो ॥
अणुमोयगाउ हरिणो । संपत्ता बंभलोगंमि ॥ ६१ ॥

एकदा च भवे पूर्वे । साधुनिंदा कृता त्वया ॥ [2]मैनका इव दृश्यंते । इति मुहुर्जुगुप्सिताः ॥ ६२ ॥ कियंतमपि कालं त्वं । स्थितो मीनोदरे ततः ॥ कर्मणा तेन भूपाल । मै-

---

१ द्वयोरपि गाथायोरेक एव भावार्थो, यथा—बलदेवमुनिंप्रति रथकारदीयमानदानानुमोदकमृग इवेति दृष्टांतो ज्ञेयः ॥

२ धीवराः,



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नकाना गृहे स्थितः ॥ ६३ ॥ इतो भवात् शुकः कश्चि-द्यत्सहस्रतमे भवे ॥ पाठितः पंजरे क्षिप्तः । क्रीडार्थं स्वगृहे त्वया ॥ ६४ ॥ तेनात्रापि भवे प्राप्तः । शुकत्वं मासमेककं ॥ पुरा कृतं पापकर्म । भुज्यते नात्र संशयः ॥ ६६ ॥

तथा—इतो भवात्सखी काचि-द्यत्सहस्रतमे भवे ॥ अत्यद्भुतकृतस्फार-शृंगारा नवयौवना ॥ ६७ ॥ अनंगसेनयाभाणि । गणिकेव विराजसे ॥ कर्मणा तेन संजाता । गणिकास्मिन् भवेऽप्यसौ ॥ ६८ ॥ युग्मं ॥ इत्याकर्ण्य गुरोर्धर्म-देशनां संशयापहां ॥ राजादयो भूरिलोकाः । प्रतिबुद्धाः सभागताः ॥ ६९ ॥ राज्यं दत्वा स्वपुत्राय । प्रव्रज्यां जगृहुर्मुदा ॥ स्वस्वभार्यायुताः सर्वे । चारित्रं प्रतिपाल्य च ॥ ७० ॥ अभूवन्निर्जराः सर्वे । चतुःपल्योपमायुषः ॥ ततश्च्युत्वा विदेहेषु । सिद्धिं यास्यंति सात्विकाः ॥ ७१ ॥ इत्युत्तमनरेंद्रस्य । श्रुत्वा चरित्रमद्भुतं ॥ स्वसंपत्त्यानुसारेण । दानं ददत सर्वदा ॥ ७२ ॥ श्रीभक्तिलाभशिष्येण । चारुचंद्रेण गुंफिता ॥ चारित्रसारगणिना । शोधितेयं कथा मुदा ॥ ७३ ॥ बालत्वेऽपि कथा चेय-मभ्यासार्थं कृता मया ॥ बालावस्थाकृतं सर्वं । महतां प्रीतये भवेत् ॥ ७४ ॥ सुपा-



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

त्रदानमाहात्म्य–प्रकाशनपरायणा ॥ श्रीउत्तमचरित्रस्य । कथेयं नंदताच्चिरं ॥ ७५ ॥

॥ इति श्रीउत्तमकुमारचरित्रकथानकं समाप्तं ॥

॥ श्रीरस्तु ॥

॥ ५७॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

॥ इति श्रीउत्तमकुमारचरित्रकथानकं समाप्तं ॥

P. P. Ac. Gunratnasuri M.S.

Jin Gun Aaradhak Trust